ष्ट इत्येतस्य युक्तस्य ठकारो भवति ॥ लट्ठी । दिट्ठी ॥

ठ is substituted for the conjunct ष्ट......

॥ अस्थिनि ॥ ११ ॥

अस्थिशब्दे युक्तस्य ठकारो भवति ॥ अट्ठी ॥

In the word अस्थि, ठ is substituted for the conjunct...

॥ स्तस्य थः ॥ १२ ॥

स्तशब्दस्य थकारो भवति । उपरिलोपापवादः ॥ हत्थो । समत्थो ॥ थुई । थवओ । कोत्थुहो ॥ हस्त । समस्त । स्तुति । स्तवक । कौस्तुभ ।

थ is substituted for स्त. This sūtra revokes sūtra I above, which would enjoin the elision of स as being the first member of the conjunct स्त......

॥ न स्तम्बे ॥ १३ ॥

स्तम्बशब्दे स्तकारस्य थकारो न भवति ॥ तंबो ॥

In the word स्तम्ब, थ is not substituted for स्त......

॥ स्तम्भे खः ॥ १४ ॥

स्तम्भशब्दे स्तकारस्य खकारो भवति ॥ खंभो ॥

In the word स्तम्भ, ख is substituted for स्त......

॥ स्थाणावहरे ॥ १५ ॥

स्थाणुशब्दे युक्तस्य खकारो भवति । अहरे हराभिधेये न भवति ॥ खाणू ॥ अहर इति किम् ॥ थाणू । हरो ॥

In the word स्थाणु, post or firm, ख is substituted for the conjunct except when it signifies god शिव...Why do we make this exception? When it signifies शिव, it becomes थ by sūtra I......

॥ स्फोटके ॥ १६ ॥

स्फोटकशब्दे युक्तस्य खकारो भवति ॥ खोडओ ॥

In the word स्फोटक, ख is substituted for the conjunct...

॥ र्यशय्याभिमन्युषु जः ॥ १७ ॥

र्य इत्यस्य शय्याभिमन्युशब्दयोश्च युक्तस्य जकारो भवति ॥ कज्जं । सेज्जा । अहिमज्जू ॥

ज is substituted for the conjunct र्य, and also for the conjunct in the two words शय्या and अभिमन्यु......

॥ तूर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः ॥ १८ ॥

एतेषु शब्देषु र्यस्य रेफो भवति ॥ तूरं । धीरं । सुंदरं । अच्छेरं । पेरंतं ॥

In the words तूर्य etc., र is substituted for the conjunct र्य......

॥ सूर्ये वा ॥ १९ ॥

सूर्यशब्दे र्यकारस्य रेफादेशो भवति वा ॥ सूरो । सुज्जो ॥

In the word सूर्य, र is optionally substituted for र्य...

॥ चौर्यसमेषु रिअं ॥ २० ॥

चौर्यसमेषु शब्देषु र्यस्य रिअं इत्यादेशो भवति ॥ चोरिअं । सोरिअं । वीरिअं ॥ चौर्य । शौर्य । वीर्य ॥ समग्रहणादाकृतिगणोऽयम् ॥

In words like चौर्य, रिअ is substituted for र्य ...By the use of the word सम in the sūtra we understand that this is a class which can only be determined by usage......

॥ पर्यस्तपर्याणसौकुमार्येषु लः ॥ २१ ॥

एषु शब्देषु र्यस्य लकारो भवति ॥ पल्लत्थं । पल्लाणं । सोअमल्लं

In the words पर्यस्त etc., ल is substituted for र्य ......

॥ र्तस्य टः ॥ २२ ॥

र्त इत्येतस्य टकारो भवति ॥ केवट्टओ । णट्टओ । णट्टई ॥

ट is substituted for र्त......

॥ पत्तने ॥ २३ ॥

पत्तनशब्दे युक्तस्य टकारो भवति ॥ पट्टणं ॥

In the word पत्तन, a town, ट is substituted for the conjunct......

॥ न धूर्तादिषु ॥ २४ ॥

धूर्त इत्येवमादिषु र्त इत्येतस्य टकारो न भवति ॥ धुत्तो । कित्ती । वत्तमाणं । वत्ता । आवत्तो । संवत्तओ । णिवत्तओ । वत्तिआ । अत्तो । कत्तरी । मुत्ती ॥ धूर्त । कीर्ति । वर्तमान । वार्ता । आवर्त । संवर्तक । निवर्तक । वर्तिका । आर्त । कर्तरी । मूर्ति ॥

ट is not substituted for र्त in the class धूर्त etc.......

॥ गर्ते डः ॥ २५ ॥

गर्तशब्दे र्तस्य डकारो भवति ॥ गड्डो ॥

In the word गर्त, ड is substituted for र्त......

॥ गर्दभसंमर्दवितर्दिविच्छर्दिषु र्दस्य ॥ २६ ॥

एतेषु र्दस्य डो भवति ॥ गड्डहो । संमड्डो । विअड्डी । विछड्डी ॥

In the words गर्दभ etc., ड is substituted for र्द......

॥ त्यथ्यद्यां चछजाः ॥ २७ ॥

त्य थ्य द्य इत्येतेषां च छ ज इत्येते यथासंख्यं भवन्ति ॥ त्यस्य ॥ णिच्चं । पच्चच्छं ॥ थ्यस्य ॥ रच्छा । मिच्छा । [illegible] ज्जा । वेज्ज ॥ नित्य । प्रत्यक्ष । रथ्या । [illegible] herever it is found ( i. e., in [illegible] word )...

च, छ, ज, are respec[illegible]

त्य, थ्य, द्य......

॥ ध्यह्योर्झः ॥ २८ ॥

ध्य ह्य इत्येतयोर्झकारो भवति ॥ ध्यस्य ॥ मज्झं । अज्झाओ ॥ ह्यस्य ॥ वज्झओ । गुज्झओ ॥ मध्य । अध्याय । वाह्यक । गुह्यक ॥

झ is substituted for the conjuncts ध्य and ह्य......

॥ ष्कस्कक्षां खः ॥ २९ ॥

ष्कस्कक्षां खकारो भवति ॥ ष्कस्य । मुक्खं । पोक्खरो ॥ स्कस्य ॥ खंदो । खंधो ॥ क्षस्य ॥ खदो । जक्खो ॥

ख is substituted for the conjuncts ष्क, स्क, and क्ष......

॥ अक्ष्यादिषु छः ॥ ३० ॥

अक्षि इत्येवमादिषु क्षकारस्य छकारो भवति ॥ अच्छी । लच्छी । छुण्णो । छीरं । छुद्धो । उक्खित्तो । सरिच्छं । उच्छू । उच्छा । छारं । रिच्छो । मच्छिआ । छुअं । छुरं । छेत्तं । वच्छो । दच्छो । कुच्छी ॥ अक्षि । लक्ष्मी । क्षुण्ण । क्षीर । क्षुब्ध । उत्क्षिप्त । सदृक्ष । इक्षु । उक्षन् । क्षार । ऋक्ष । मक्षिका । क्षुत । क्षुर । क्षेत्र । वक्षस् । दक्ष । कुक्षि । इत्येवमादयः ॥

In words अक्षि etc., छ is substituted for क्ष......

॥ क्षमावृक्षक्षणेषु वा ॥ ३१ ॥

एतेषु क्षकारस्य छकारो भवति वा । छमा । खमा ॥ वच्छो । रुक्खो ॥ छणं । खणं ॥ वृक्षशब्दे ऋकारस्याकारे कृते क्षणशब्दे चोत्सवाभिधायिनि छत्वमिष्यते ॥

॥ पर्यस्तपर्याणसौकुमार्येषु ल्लः ॥ ...nd क्षण, छ is optionally substi-
...noted that छ is used in
एषु शब्देषु र्यस्य लकारो भवति ॥ ...in क्षण when it signi-
In the words पर्यस्त etc., ल is substitu...

|| ष्मपक्ष्मविस्मयेषु म्हः || ३२ ||

ष्म इत्येतस्य पक्ष्मविस्मयशब्दयोश्च युक्तस्य म्हकारो भवति || ष्मस्य || गिम्हो | उम्हा | पम्हो | विम्हओ || ग्रीष्म | उष्मन् | पक्ष्मन् | विस्मय ||

म्ह is substituted for ष्म and also for the conjunct in पक्ष्म and विस्मय......

|| ह्नस्नष्णक्ष्णश्नां ण्हः || ३३ ||

ह्नादीनां ण्ह इत्ययमादेशो भवति || ह्नस्य | वण्ही | जण्हू || स्नस्य || ण्हाणं | पण्हुदं || ष्णस्य || विण्हू | कण्हो || क्ष्णस्य || सण्हं | तिण्हं || श्नस्य || पण्हो | सिण्हो || वह्नि | जह्नु | स्नान | प्रस्नुत | विष्णु | कृष्ण | श्लक्ष्ण | तीक्ष्ण | प्रश्न | शिश्न ||

ण्ह is substituted for ह्न, स्न, ष्ण, क्ष्ण and श्न......

|| चिह्ने न्धः || ३४ ||

चिह्नशब्दे युक्तस्य न्ध इत्ययमादेशो भवति || चिंधं ||

In the word चिह्न, न्ध is substituted for the conjunct.

|| ष्पस्य फः || ३५ ||

ष्प इत्येतस्य फ इत्ययमादेशो भवति || पुप्फं | सप्फं | णिप्फाओ || पुष्प | शष्प | निष्पाव ||

फ is substituted for ष्प......

|| स्पस्य सर्वत्र स्थितस्य || ३६ ||

स्प इत्येतस्य सर्वत्र स्थितस्य फ इत्ययमादेशो भवति || फंसो | फंदणं || स्पर्श | स्पन्दन ||

फ is substituted for स्प wherever it is found (*i. e.*, in the beginning or end of a word)...

॥ सि च ॥ ३७ ॥

स्पस्य क्वचित् सि इत्ययमादेशो भवति ॥ पाडिसिद्धी ॥ प्रतिस्पर्द्धिन् ॥

सि is also sometimes substituted for स्प......

॥ बाष्पेऽश्रुणि हः ॥ ३८ ॥

बाष्पशब्दे ष्प इत्येतस्य हकारो भवति अश्रुणि वाच्ये ॥ बाहो ॥ अश्रुणि किं ॥ बप्फो ॥ बाष्प उष्मन् ॥

ह is substituted for ष्प in the word बाष्प when it signifies 'a tear'......Why do we specify this signification ? When it signifies 'hot vapour' we must use बप्फो (by sūtra 35 above ).

॥ कार्षापणे ॥ ३९ ॥

कार्षापणशब्दे युक्तस्य हकारो भवति ॥ काहावणो ॥

ह is substituted for the conjunct in the word कार्षापण...

॥ श्चत्सप्सां छः ॥ ४० ॥

एतेषां छकारो भवति ॥ श्चस्य । पच्छिमं । अच्छेरं ॥ त्सस्य । वच्छो । वच्छरो ॥ प्सस्य । लिच्छा । जुगुच्छा ॥ पश्चिम । आश्चर्य । वत्स । वत्सर । लिप्सा । जुगुप्सा ॥

छ is substituted for the conjuncts श्च, त्स and प्स...

॥ वृश्चिके ञ्छः ॥ ४१ ॥

वृश्चिकशब्दे श्चकारस्य ञ्छ इत्ययमादेशो भवति ॥ विञ्छुओ ।

In the word वृश्चिक, ञ्छ is substituted for श्च......

॥ नोत्सुकोत्सवयोः ॥ ४२ ॥

उत्सुक उत्सव इत्येतयोः त्स इत्येतस्य छकारो न भवति ॥ श्चत्सप्सां छ इति प्राप्ते प्रतिषिध्यते ॥ उस्सुओ । उस्सवो ॥

In the words उत्सुक and उत्सव the substitution of छ for त्स ( enjoined by sūtra 40 ) is prohibited...We have therefore उस्सुओ and उस्सवो ( by iii. 1, 50 ).

॥ न्मो मः ॥ ४३ ॥

न्म इत्येतस्य म इत्ययमादेशो भवति । अधोलोपे प्राप्ते । जम्मो । वम्महो ॥ जन्म । मन्मथ ॥

म is substituted for न्म, although म is properly elided when it is the second member of a conjunct......

॥ म्नज्ञपञ्चाशत्पञ्चदशेषु णः ॥ ४४ ॥

म्न ज्ञ इत्येतयोः पञ्चाशत् पञ्चदश शब्दयोश्च युक्तस्य णकारो भवति ॥ म्नस्य ॥ पज्जुण्णो ॥ ज्ञस्य ॥ जण्णो । विण्णाणं ॥ पण्णासा । पण्णरहो ॥ प्रद्युम्न । यज्ञ । विज्ञान । पञ्चाशत् । पञ्चदश ॥

ण is substituted for म्न, ज्ञ, and for the conjuncts in the words पञ्चाशत् and पञ्चदश......

॥ तालवृन्ते ण्टः ॥ ४५ ॥

तालवृन्ते युक्तस्य ण्ट इत्ययमादेशो भवति ॥ तालवेण्टअं ॥

In the word तालवृन्त, ण्ट is substituted for the conjunct...

॥ भिन्दिपाले ण्डः ॥ ४६ ॥

भिन्दिपालशब्दे युक्तस्य ण्ड इत्ययमादेशो भवति ॥ भिण्डिवालो ॥

In the word भिन्दिपाल, a dart, ण्ड is substituted fos the conjunct......

॥ विह्वले भहौ वा ॥ ४७ ॥

विह्वलशब्दे युक्तस्य भकारहकारौ भवतो वा ॥ वेब्भलो। विहलो ॥

In the word विह्वल, भ and ह are optionally substituted for the conjunct......

॥ आत्मनि पः ॥ ४८ ॥

आत्मशब्दे युक्तस्य पकारो भवति ॥ अप्पा ॥

In the word आत्मन्, प is substituted for the conjunct...

॥ क्मस्य ॥ ४९ ॥

क्म इत्येतस्य पकारो भवति ॥ रुप्पं । रुप्पिणी ॥ योगविभागो नित्यार्थः ॥

प is substituted for the conjunct क्म ..The commentator remarks that this and the preceding sūtra ( which might otherwise have been combined into one sūtra ) are separated, because the latter of the two ( *i. e.*, sūtra 49 ) is absolute. while the former ( sūtra 43 ) is only partially applicable, as आत्मन् admits of another form ( see v. 45 ) besides अप्पा.

॥ शेषादेशयोर्द्वित्वमनादौ ॥ ५० ॥

युक्तस्य यौ शेषादेशभूतौ तयोरनादौ वर्तमानयोर्द्वित्वं भवति ॥ शेषस्य तावत् ॥ भुत्तं । मग्गो ॥ आदेशस्य ॥ लट्ठी । दिट्ठी । हत्थो ॥ अनादाविति किम् ॥ खलिअं । खंभो । थवओ ॥ भुक्त । मार्ग । यष्टि । दृष्टि । हस्त । स्खलित । स्तम्भ । स्तवक ॥

Wherever after performing an elision ( शेष ) or substitution (आदेश) enjoined by a rule, a single consonant comes to represent a conjunct, this letter is always doubled, except at the beginning of a word.........Why do we except those which are at the beginning of a word? Compare the cases of खलिअ for स्खलित etc.

॥ वर्गेषु युजः पूर्वः ॥ ५१ ॥

युक्तस्य यौ शेषादेशावनादिभूतौ तयोर्द्वित्वेऽपि विहिते अध ऊर्ध्वेन यो वर्गेषु , वर्गो द्वितीयश्चतुर्थो वा विहितस्तस्य पूर्वः प्रथमस्तृतीयो वा भवति ॥ वर्गेषु युग्मस्य द्वितीयस्य प्रथमश्चतुर्थस्य तृतीयो द्वित्वेन विधीयते । अयुग्मयोः प्रथमतृतीयपञ्चमरूपयोः शेषादेशयोस्तावेव भवतः ॥

॥ आङो ज्ञस्य ॥ ५५ ॥

आङ उत्तरस्य ज्ञ इत्येतस्यादेशस्य द्वित्वं न भवति ॥ आणा । आणत्ती ॥ आज्ञा । आज्ञप्ति ॥ आङ इति किम् ॥ सण्णा ॥ संज्ञा ॥

When ज्ञ is preceded by the preposition आ, its substitute ( *i. e.* ण ) is not doubled......Why do you say 'when preceded by आ'? Because we want the doubling in words like सण्णा for संज्ञा.

॥ न बिंदुपरे ॥ ५६ ॥

अनुस्वारपरे द्वित्वं न भवति ॥ संकंतो । संझा ॥ संक्रान्त । संध्या ॥

A letter, which immediately follows अनुस्वार, is not doubled......

॥ समासे वा ॥ ५७ ॥

॥ समासे शेषादेशयोर्वा द्वित्वं भवति ॥ णइग्गामो । णईगामो । कुसुमप्पअरो । कुसुमपअरो । देवत्थुई । देवथुई । आणालक्खंभो । आणालखंभो ॥ नदीग्राम । कुसुमप्रकर । देवस्तुति । आलानस्तम्भ ॥

In a compound word, the doubling is optional, whether in the case of elision or substitution...

॥ सेवादिषु च ॥ ५८ ॥

सेवा इत्येवमादिषु चानादौ वा द्वित्वं भवति ॥ सेव्वा सेवा । ऊर्ध्वं. एअं । णक्खो णहो । देव्वं दइवं । असिव्वं असिवं । तेलोक्कं
स्तृतीया ं । णिहित्तो णिहिओ । तुण्हिक्को तुण्हिओ । कण्णिआरो काणि-
द्वित्वेन वि दिग्घं दीहं । रत्ती राई । दुक्खिओ दुहिओ । अस्सो असो ।
तावेव भवत रो । विस्सासो वीसासो । णिस्सासो णीसासो । रस्सी रसी
। पुस्सो पुसो ॥ सेवा । एक । नख । दैव । अशि

त्रैलोक्य । निहित । तूष्णीक । कर्णिकार । दीर्घ । रात्रि । दुःखित । अस्त्र । ईश्वर । विश्वास । निश्वास । रश्मि । मित्र । पुष्य ॥

उभयत्र विभाषेयं सेवादीनामप्राप्ते दीर्घादीनां च प्राप्ते ॥

In the words सेवा etc., the medial letter is optionally doubled......The alternative can be considered in two ways; in words like सेवा, there would have been no occasion for the doubling except for this rule; in words like दीर्घ, the doubling is already enjoined by other rules ( *e. g.*, iii. 3 and iii. 50 ), and therefore the option granted by this is required to dispense with their operation.

|| विप्रकर्षः || ५९ ||

अधिकारोऽयम् । आ परिच्छेदसमाप्तेः युक्तस्य विप्रकर्षो भवति ॥

This, being an अधिकारसूत्र, will be implied in the following sūtras to the end of the section. ( युक्तस्य still continues to be implied from sūtra 9. We are, therefore, to understand that the subject of the following sūtras to the end of the section will be ) the separation ( विप्रकर्ष ) of conjuncts.

|| क्लिष्टश्लिष्टरत्नक्रियाशार्ङ्गेषु तत्स्वरवत्पूर्वस्य || ६० ||

क्लिष्टादिषु युक्तस्य विप्रकर्षो भवति । विप्रकृष्टस्य च यः पूर्वो वर्णो निरर्थस्तस्य तत्स्वरता भवति । तेनैव पूर्वेण स्वरेण पूर्वो वर्णः सार्थो भवतीत्यर्थः ॥ किलिट्ठं । सिलिट्ठं । रअणं । किरिआ । सारंगो ॥ ६०

In the words क्लिष्ट etc., the conjunct consonan[t] ... separated ; and the first consonant, which has n[o] ... inter... its own, undergoes vocalisation, and becomes ... elisions wi[th] the original vowel......

|| कृष्णे वा || ६१ ||

कृष्णशब्दे युक्तस्य वा विप्रकर्षो भवति । पूर्वस्य च तत्स्वरता || व्यवस्थितविभाषेयम् । तेन वर्णे नित्यं विप्रकर्षः । विष्णौ तु न भवत्येव || कसणो || कण्हो ||

In the word कृष्ण, the separation of the conjunct ष्ण is optional; in the case of the separation the vowel must be supplied as before: here, however, the option is definitely restricted: The separation is obligatory when कृष्ण means black colour: as, कसण; but it is forbidden when it means विष्णु; as कण्हो......

|| इः श्रीह्रीक्रीतक्लान्तक्लेशम्लानस्वप्नस्पर्शहर्षार्हगर्हेषु || ६२ ||

एषु युक्तस्य विप्रकर्षो भवति । पूर्वस्य इकारः । तत्स्वरता च भवति || सिरी । हिरी । किरीतो । किलंतो । किलेसो । मिलाणं । सिविणो । फरिसो । हरिसो । अरिहो । गरिहो || श्री । ह्री । क्रीत । क्लान्त । क्लेश । म्लान । स्वप्न । स्पर्श । हर्ष । अर्ह । गर्ह ||

In the words श्री etc., the conjuncts are separated and the first consonant adds इ and not the original vowel......

|| अः क्ष्माश्लाघयोः || ६३ ||

क्ष्मा श्लाघा इत्येतयोर्युक्तस्य विप्रकर्षो भवति। पूर्वस्य अकारस्तत्स्वरता च भवति || खमा । सलाहा ||

In the words क्ष्मा and श्लाघा the conjunct is divided and the first consonant is sounded with अ......

|| स्नेहे वा || ६४ ||

स्नेहशब्दे युक्तस्य विप्रकर्षो वा भवति । पूर्वस्य च अकारस्तत्स्वरता च भवति || सणेहो । णेहो ||

In the word स्नेह the division of the conjunct is option- when it does take place, the first consonan with अ......

॥ उः पद्मतन्वीसमेषु ॥ ६५ ॥

पद्मशब्दे तन्वी इत्येवंसमेषु च युक्तस्य विप्रकर्षो भवति । पूर्वस्य च उकारस्तत्स्वरता च भवति ॥ पउमं । तणुई । लहुई ॥

In पद्म and words like तन्वी ( such as लघ्वी etc. ) the conjunct is divided, and the first consonant is sounded with उ......

॥ ज्यायामीत् ॥ ६६ ॥

ज्याशब्दे युक्तस्य विप्रकर्षो भवति । पूर्वस्य च ईकारस्तत्स्वरता च ॥ जीआ ॥

In the word ज्या, bow-string, the conjunct is divided and the first consonant is sounded with ई.

॥ इति वररुचिकृते प्राकृतप्रकाशे युक्तवर्णविधिर्नाम तृतीयः परिच्छेदः ॥

## ॥ अथ चतुर्थः परिच्छेदः ॥

॥ संधावचामज्लोपविशेषा बहुलम् ॥ १ ॥

अचामिति प्रत्याहारग्रहणम् । अजिति च । संधौ वर्तमानानामचां स्थाने अज्विशेषा लोपविशेषाश्च बहुलं भवन्ति ॥

अज्विशेषास्तावत् । जउणअडं जउणाअडं । णइसोत्तो णईसोत्तो। वहुसुहं वहूसुहं । कण्णउरं कण्णऊरं । सिरोवेअणा सिरवेअणा । पीआपीअं पिआपिअं । सीआसीअं सिआसिअं । सव्वोमुओ सव्वोमूओ । सरोरुहं सररुहं ॥

लोपविशेषाः ॥ राउलं राअउलं । तुहद्धं तुहअद्धं । महद्धं महअद्धं । वावडणं वाअवडणं । कुंभारो कुंभआरो । पवणुद्धअं ॥

The expressions अचाम् and अच् refer to the प्रत्याहार अच्, vowels. When vowels are in संधि, are in a state of intermediate conjunctions, various kinds of vowels and elisions arise......

संयोगपरे सर्वत्र पूर्वस्याचो लोपः ।

क्वचिन्नित्यं क्वचिदन्यदेव बहुलग्रहणात् । तेनान्यदपि लाक्षणिककार्यं भवति ॥

When a conjunct consonant follows, it is always the first of the two meeting vowels, which is elided (of course when there is any elision at all). From the use of बहुलम्, variously, in the sūtra, we conclude that these changes are in some cases absolute, in others they admit of different forms ; hence when other forms are met with, they are still to be considered as here provided for in Grammar.

॥ उदुम्बरे दोर्लोपः ॥ २ ॥

उदुम्बरशब्दे दु इत्येतस्य लोपो भवति ॥ उंबरं ॥
In the word उदुम्बर, दु is elided......

॥ कालायसे यस्य वा ॥ ३ ॥

कालायसशब्दे यस्य वा लोपो भवति ॥ कालासं कालाअसं ॥
In the word कालायस, य is optionally elided......

॥ भाजने जस्य ॥ ४ ॥

भाजनशब्दे जकारस्य लोपो वा भवति ॥ भाणं भाअणं ॥
In भाजन, ज is optionally elided......

॥ यावदादिषु वस्य ॥ ५ ॥

यावदित्येवमादिषु वकारस्य वा लोपो भवति ॥ जा जाव । ता ताव । पाराओ पारावओ । अणुत्तंत अणुवत्तंत । जीअं जीविअं । एअं एव्वं । एअ एव्व । कुअलअं कुवलअं ॥ यावत् । तावत् । पारावत । अनुवर्तमान । जीवित । एवं । एव । कुवलय । इत्येवमादयः ॥
In the words यावत etc , व is optionally elided......

॥ अन्त्यस्य हलः ॥ ६ ॥

वेति निवृत्तम् । शब्दानां योऽन्त्यो हल् तस्य लोपो भवति ॥ जसो । णहं । सरो । कम्मो । जाव । ताव ॥ यशस् । नभस् । सरस् । कर्मन् । यावत् । तावत् ॥

The word वा implied in the preceding sūtras is no longer implied. A final consonant is always elided......

॥ स्त्रियामात् ॥ ७ ॥

स्त्रियां वर्तमानस्यान्त्यहल आकारो भवति ॥ सरिआ । पडिवआ । वाआ । सरित् । प्रतिपद् । वाच् ॥

आ is substituted for the final consonant of a feminine word......

॥ रो रा ॥ ८ ॥

स्त्रियामन्त्यस्य हलो रेफस्य रा इत्ययमादेशो भवति ॥ धुरा । गिरा ॥

रा is substituted for the final र in a feminine word......

॥ न विद्युति ॥ ९ ॥

विद्युच्छब्दे आकारो न भवति ॥ विज्जू ॥

आ is not substituted for the final consonant of the word विद्युत्......

॥ शरदो दः ॥ १० ॥

शरच्छब्दस्यान्त्यहलो दो भवति ॥ सरदो ॥

द is substituted for the final consonant of the शरद्......

॥ दिक्प्रावृषोः सः ॥ ११ ॥

दिक्शब्दस्यान्त्यहलः प्रावृड्शब्दस्यापि सकारो भवति ॥ दिसा। पाउसो ॥

स is substituted for the final consonant of the words दिश् and प्रावृष्......

॥ मो बिन्दुः ॥ १२ ॥

अन्त्यस्य हलो मकारस्य बिन्दुर्भवति ॥ अच्छं। वच्छं। भद्दं। अग्गिं। दट्ठुं। वणं। धणं ॥

अनुस्वार is substituted for the final म्......

॥ अचि मश्च ॥ १३ ॥

अचि परतो मो भवति वा ॥ फलमवहरइ ॥ फलं अवहरइ ॥

When a vowel immediately follows, म् may optionally remain (or, in other words, संधि in this case is allowed).

॥ नञोर्हलि ॥ १४ ॥

नकारञकारयोर्हलि परतो बिन्दुर्भवति मकारश्च ॥ नस्य ॥ अंसो अम्सो। कंसो कम्सो ॥ ञस्य ॥ वंचणीअं वम्चणीअं। विंझो विम्झो ॥

अनुस्वार is substituted for न् and ञ् when followed by a consonant, and so also is म (as we infer from the preceding sūtra)......

॥ वक्रादिषु ॥ १५ ॥

वक्रादिषु शब्देषु बिन्दुरागमो भवति ॥ वंकं। तंसं। ह्रंसो। भंसू। मंसू। गुंठी। मंथं। मणंसिणी। दंसणं। फंसो। वण्णो। पडिंसुदं। अंसो। अहिमुंको ॥ वक्र। त्र्यस्त्र। ह्रस्व। अश्रु। श्मश्रु। गृष्टि। [illegible]। मनस्विनी। दर्शन। स्पर्श। वर्ण। प्रतिश्रुत। अश्व। अभिमुक्त। एत[illegible]दयः ॥

[In] the words वक्र etc., अनुस्वार is inserted as an augme[nt]

॥ मांसादिषु वा ॥ १६ ॥

मांसादिषु शब्देषु वा विन्दुः प्रयोक्तव्यः ॥ मंसं मासं । कहं कह । णूणं णूण । तहिं तहि । असुं असु ॥ तदयमपठितो मांसादिर्गणः। यत्र क्वचिद् वृत्तभङ्गभयात् त्यज्यमानः क्रियमाणश्च विन्दुर्भवति स मांसादिषु द्रष्टव्यः ॥

In the words मांस etc., the use of अनुस्वार is optional... There is no definite class of words such as मांस etc., but wherever, through fear of violating the metre, अनुस्वार is sometimes used and sometimes omitted, the commentator wishes such a word to be considered as included in the class referred to above......

॥ ययि तद्वर्गान्तः ॥ १७ ॥

ययि परतो विन्दुस्तद्वर्गान्तो वा भवति ॥ सङ्का । सङ्खो । अङ्को । अङ्गं । सञ्चरइ । सण्ढो । सन्तरइ । सम्पत्ती ॥ ययीति किम् । अंसो ॥ वाधिकारात् । पंकं । बिंदू । संका । संखो ॥

When any consonant except ह and the sibilants ( *i. e.*, letters in the यय् प्रत्याहार ) immediately follows, अनुस्वार may optionally become the nasal of the class to which the letter belongs......Why do we use यय् in the sūtra ? That we may exclude ह and the sibilants and have अनुस्वार only in अंसो etc. We may also use the option of the rule and have......

॥ नसान्तप्रावृट्शरदः पुंसि ॥ १८ ॥

नकारान्ताः सकारान्ताश्च प्रावृट्शरदौ च पुंसि प्रयोक्तव्याः ॥ ताः ॥ कम्मो । जम्मो । वम्मो ॥ सान्ताः ॥ जसो । तमो । सरो ॥ सो । सरदो ॥

Nouns ending in न् and स् and the two words प्रावृष् शरद् are to be used in the masculine gender......

॥ न शिरोनभसी ॥ १९ ॥

शिरस् नभस् इत्येतौ न पुंसि प्रयोक्तव्यौ ॥ सिरं । णहं ॥

The words शिरस् and नभस् are not to be used in the masculine gender......

॥ पृष्ठाक्षिप्रश्नाः स्त्रियां वा ॥ २० ॥

एते स्त्रियां वा प्रयोक्तव्याः ॥ पुट्ठी पुट्ठं । अच्छी अच्छं । पण्हा पण्हो ॥ पृष्ठ । अक्षि । प्रश्न ॥

The words पृष्ठ, अक्षि and प्रश्न may optionally be used in the feminine gender......

॥ ओदवापयोः ॥ २१ ॥

अव अप इत्येतयोरुपसर्गयोर्वा ओत्वं भवति ॥ ओहासो अव-हासो ॥ ओसारिअं अवसारिअं ॥ अवहास । अपसारित ॥

ओ is optionally substituted for the prepositions अव and अप when in composition......

॥ तल्त्वयोर्दात्तणौ ॥ २२ ॥

तल् त्व इत्येतयोः प्रत्यययोर्यथासंख्यं दा त्तण इत्येतावादेशौ स्तः ॥ पीणदा । मूढदा । पीणत्तणं । मूढत्तणं ॥

दा and त्तण are respectively substituted for the affixes तल् and त्व ( which in Sanskrit are used to form abstract nouns ).

॥ क्त्व ऊणः ॥ २३ ॥

क्त्वाप्रत्ययस्य ऊण इत्ययमादेशो भवति ॥ घेऊण । सोऊण । काऊण । दाऊण ॥ गृहीत्वा । श्रुत्वा । कृत्वा । दत्वा ॥

ऊण is substituted for त्वा ( The affix of the indeclinable past participle )......

॥ तृण इरः शीले ॥ २४ ॥

शीले यस्तृनप्रत्ययो विहितस्तस्य इर इत्ययमादेशो भवति ॥ भ्रमणशीलो भमिरो । हसनशीलो हसिरो ॥

इर is substituted for the affix तृन signifying शील, habits or disposition......

॥ आल्विल्लोल्लालवन्तेन्ता मतुपः ॥ २५ ॥

आलु इल्ल उल्ल आल वन्त इन्त इत्येत आदेशा मतुपः स्थाने भवन्ति ॥

आलुस्तावत् ॥ ईसालू । णिद्दालू ॥ इल्लः ॥ विआरिल्लो । मालाइल्लो ॥ उल्लः ॥ विआरुल्लो ॥ आलः ॥ धणालो । सद्दालो ॥ वन्तः ॥ धणवन्तो । जोव्वणवन्तो ॥ इन्तः ॥ रोसाइन्तो पाणाइन्तो ॥ यथादर्शनमेते प्रयोक्तव्याः न सर्वे सर्वत्र ॥

ईर्ष्यावत् । निद्रावत् । विकारवत् । मालावत् । धनवत् । शब्दवत् । यौवनवत् । रोषवत् । प्राणवत् ॥

आलु, इल्ल, उल्ल, आल, वन्त, इन्त are substituted for मतुप्, the affix signifying possession......

These various substitutes for मतुप् must not be used indiscriminately, but with a due regard to forms found in use in classical authors.

[ क्वचिद्वा मतुपोऽन्त्यस्य मंतो वा दृश्यते क्वचित् ।

हणुमा । हणुमंतो ॥

Sometimes we find आ instead of मतुप् and sometimes मन्त.

इल्लोल्लावपरे प्रायः शैषिकेषु प्रयुञ्जते ।

पौरस्त्यं पुरोभवं पुरिल्लं । आत्मीयं अप्पुल्लं ॥

Others use the substitutes इल्ल and उल्ल in affixes,, in grammar called शैषिक ( co

कंव 2.92. )

तु ॥ दंष्ट्रा ।

तुर्थं । चाउ-

तं ॥ उत्पलं ।

मूः । भुमआ ॥

परिमाणे किमादिभ्यो भवंति केद्दहादयः ।

केद्दहं केत्तिअं । जेद्दहं । जेत्तिअं । तेद्दहं तेत्तिअं । एद्दहं एत्तिअं।

In the sense of measure केद्दह and others are substituted for similar derivatives from किम् etc.

कृत्वसो हुत्तमित्यन्ये । देशिशब्दः स इष्यते ।

सअहुत्तं । सहस्सहुत्तं ॥

Others add हुत्तं as a substitute for कृत्वस्. But the commentator regards it as a देशी word.

जातौ वा स्वार्थिकः कः ।

जातौ स्वार्थे ककारः प्रयोक्तव्यः ॥ ]

The affix क is optionally added to words signifying a class-name without changing its meaning......

॥ विद्युत्पीताभ्यां लः ॥ २६ ॥

विद्युत्पीतशब्दाभ्यां परतः स्वार्थे लप्रत्ययो भवति ॥ विज्जू । विज्जुली ॥ पीअं । पीअलं ॥

The affix ल is used at the end of the words विद्युत् and पीत, without altering their meaning......

[ ॥ वृन्दे वो रः ॥ २७ ॥ ]

वृन्दशब्दे वकारात्परः स्वार्थे रेफो वा प्रयोक्तव्यः ॥ व्रंदं । वंदं ॥

In the word वृन्द, र is optionally used after व, without altering its meaning......

॥ करेण्वां रणोः स्थितिपरिवृत्तिः ॥ २८ ॥

करेणुशब्दे रेफणकारयोः स्थितिपरिवृत्तिर्भवति ॥ कणेरू ॥

॥ ति ॥ करेणू ॥

क्त्वा॰ word करेणु, a female elephant, र and ण क्ृ!

काउण । दाऊ.... From the express mention of the femini-

कण is su॰pt the rule does not hold good in !

past participle

॥ आलाने लनोः ॥ २९ ॥

आलानशब्दे लकारनकारयोर्हल्मात्रयोः स्थितिपरिवृत्तिर्भवति ॥ आणालखंभो ॥

In the word आलान, an elephant's post, the ल and न are transposed ( of course without their vowel as before) ......

॥ बृहस्पतौ बहोर्भऔ ॥ ३० ॥

बृहस्पतिशब्दे बकारहकारयोर्यथासंख्यं भकारअकारौ भवतः ॥ भअप्फई ॥

In word बृहस्पति, भ and अ are respectively substituted for ब and ह......

॥ मलिने लिनोरिलौ वा ॥ ३१ ॥

मलिनशब्दे लिकारनकारयोर्यथासंख्यमिकारलकारौ वा भवतः ॥ मइलं । मलिणं ॥

In the word मलिन, इ and ल are optionally substituted for लि and न respectively......

॥ गृहे घरोऽपतौ ॥ ३२ ॥

गृहशब्दे घर इत्ययमादेशो भवति । पतिशब्दे परतो न भवति ॥ घरं भवने ॥ अपताविति किम् ॥ गहवई ॥

घर is substituted for गृह, except when it is followed by पति... Why do we make this exception ? Because we should have गहवइ for गृहपति .....

॥ दाढादयो बहुलम् ॥ ३३ ॥

दाढा इत्येवमादयः शब्दा बहुलं निपात्यन्ते दंष्ट्रादिषु ॥ दंष्ट्रा । दाढा ॥ इदानीम् । एण्हिं ॥ दुहिता । धीआ धूदा ॥ चातुर्थं । चाउत्थं ॥ मण्डूकः । मंडूरो ॥ गृहे निहितं । घरे णिहितं ॥ उत्पलं । कंदोट्टो ॥ गोदावरी । गोला ॥ ललाटं । णिडालं ॥ भ्रूः । भुमआ ॥

वैदूर्यं वेलुरिअं ॥ उभयपार्श्वं । अवहोवासं ॥ चूतः । माइंदो माअंदो ॥ आदिशब्दोऽयं प्रकारे । तेन सर्व एव देशसंकेतप्रवृत्तभाषाशब्दाः परिगृहीताः ॥

The class of words दाढा etc., are irregularly substituted for दंष्ट्रा etc.......The word आदि in the sūtra is used in the sense of similitude (प्रकार) or class; therefore, all words from popular dialects may be considered as comprehended under this rule, which are used by convention in different provinces ( देशसंकेतप्रवृत्तभाषाशब्द ).

॥ इति वररुचिकृते प्राकृतप्रकाशे संकीर्णविधिर्नाम चतुर्थः परिच्छेदः ॥

## ॥ अथ पञ्चमः परिच्छेदः ॥

### ॥ अत ओत्सोः ॥ १ ॥

अकारान्ताच्छब्दात्परस्य सोः स्थाने ओत्वं भवति ॥ वच्छो । वसहो । पुरिसो ॥ वृक्षः । वृषभः । पुरुषः ॥

ओ is substituted for सु, the affix of the nom. sing., after a word ending in अ......

### ॥ जश्शसोर्लोपः ॥ २ ॥

अत इत्यनुवर्तते । अकारान्तस्यानन्तरं यौ जश्शसौ तयोर्लोपो भवति ॥ वच्छा सोहंति । वृक्षाः शोभन्ते । जश्शस्ङस्याम्सु दीर्घ इति दीर्घे कृते पश्चाल्लोपो जसः ।

वच्छे णिअच्छह । वृक्षान्नियच्छत ॥ एच्च सुपि इत्येत्वे कृते शसो लोपः ॥

जस् and शस्, the affixes of the nom. and acc. plural, are elided after words ending in अ......Here the final अ becomes ए by sūtra 12 and then शस् is elided......Here the vowel अ is lengthened by sūtra 11, and then the affix जस् is elided......

॥ अतोऽमः ॥ ३ ॥

अकारान्तस्यानन्तरं योऽम् द्वितीयैकवचनं तदकारस्य लोपो भवति ॥ वच्छं पेक्खइ ॥ मो बिन्दुरिति बिन्दुः ॥

The अ of अम्, the affix of the acc. sing., is elided after words ending in अ......For the अनुस्वार see iv. 12.

॥ टामोर्णः ॥ ४ ॥

अतोऽनन्तरं टामोस्तृतीयैकवचनषष्ठीबहुवचनयोर्णकारो भवति ॥ वच्छेण । वच्छाण । एच्च सुप्येत्वम् । जश्शस्ङस्याम्सु दीर्घ इति दीर्घः ॥

After words ending in अ, ण is substituted for टा and आम्, the affixes of the instr. sing. and genitive plural...... The ए in place of the ending अ of the word in the former is caused by sūtra 12, and the long vowel in the latter, by sūtra 11.

॥ भिसो हिं ॥ ५ ॥

अतोऽनन्तरस्य भिसो हिं भवति ॥ वच्छेहिं ॥ एच्च सुपि इत्येत्वम्॥

हिं is substituted for भिस्, the affix of the instr. plural, after words ending in अ......The ए in place of the ending अ of the word is caused by sūtra 12.

॥ ङसेरादोदुहयः ॥ ६ ॥

अतोऽनन्तरस्य ङसेः पञ्चम्येकवचनस्य स्थाने आ दो दु हि इत्येत आदेशा भवन्ति ॥ वच्छा । वच्छादो । वच्छादु । वच्छाहि ॥ जश्शस्ङस्याम्सु दीर्घत्वम् ॥

After words ending in अ, the अ, आ, दो, दु are severally substituted for ङसि, the affix of the ablative. sing......For the lengthening of अ, see sūtras 11 and 13.

॥ भ्यसो हिंतो सुंतो ॥ ७ ॥

[अतो]ऽनन्तरस्य भ्यसो हिंतो सुंतो इत्येतावादेशौ भवतः ॥ वच्छाहिंतो । [व]च्छासुंतो ॥ ए च सुपि इति चकारेण दीर्घत्वम् ॥

After words ending in अ, हिंतो and सुंतो are substituted for भ्यस्, the affix of the ablative plural......The lengthening of the ending vowel of the word is due to च in sūtra 12.

|| स्सो ङसः || ८ ||

अतोऽनन्तरस्य ङसः स्स इत्यादेशो भवति || वच्छस्स ||

After words ending in अ, स्स is substituted for ङस्, the affix of the genitive sing......

|| ङेरेम्मी || ९ ||

अतोऽनन्तरस्य ङेः ए म्मि इत्यादेशौ भवतः || वच्छे | क्वचिद् ङसिङ्योर्लोपः || वच्छम्मि ||

After words ending in अ, ए and म्मि are substituted for ङि, the affix of the loc. sing,......For the elision of अ before ए, see sūtra 13 below......

|| सुपः सुः || १० ||

अतोऽनन्तरस्य सुपः सु इत्यादेशो भवति || वच्छेसु | ए च सुपि इत्येत्वम् ||

After words ending in अ, सु is substituted for सुप्, the affix of the loc. plural......For ए in place of the ending अ of the word, see sūtra 12.

|| जश्शस्ङस्यांसु दीर्घः || ११ ||

जसादिषु परतोऽतो दीर्घो भवति || वच्छा सोहंति | जश्शसोर्लोप इति जसो लोपः || वच्छादो आगदो | वच्छादु | वच्छाहि || ङसेरादोदुहयः || वच्छाण || टामोर्णः ||

For the final अ of the nouns, आ is substituted before the affixes of जस्, शस्, ङसि and आम्......For the elision of जस् see sūtra 2......For दो, दु, हि, see sūtra 6......For [illegible], see sūtra 4.

॥ ए च सुप्यङिङसोः ॥ १२ ॥

अत अकारस्यैत्वं भवति सुपि परतो ङिङसौ वर्जयित्वा । चकाराद्दीर्घश्च ॥ वच्छे पेक्खह ॥ जश्शसोर्लोपः ॥ वच्छेण । टामोर्णः ॥ वच्छेहिं ॥ वच्छेसु ॥

चकाराद्दीर्घश्चेति ॥ वच्छाहिंतो वच्छासुंतो ॥ भ्यसो. हिंतो सुंतो ॥ अङिङसोरिति किम् ॥ वच्छम्मि । वच्छस्स ॥

ए is substituted for the ending अ of a word before all the case-affixes except ङि and ङस्; and from the word च in the sūtra we conclude that the lengthening is also allowed......For the elision of शस् see sūtra 2...For ण see sūtra 4; the long vowel also is used......For हिंतो and सुंतो see sūtra 7. Why do we except ङि and ङस्? Because we have वच्छम्मि and वच्छस्स.

॥ क्वचिद् ङसिङ्योर्लोपः ॥ १३ ॥

अतो ङसि ङि इत्येतयोः परतः क्वचिल्लोपो भवति ॥ वच्छा आगदो । ङसेरादोदुहय इति ॥ वच्छे ठिअं । ङेरम्मीत्येत्वम् ॥

When ङसि and ङि follow, the final अ of nouns is elided in certain cases. ( It means we elide the ending अ before the affixes, in order to avoide necessity of lengthening in the ablative form by sūtra 11, and to avoid similarly a form in the loc. such as वच्छए by sūtra 9. )

॥ इदुतोः शसो णो ॥ १४ ॥

इदुदन्तयोः शसो णो भवति ॥ अग्गिणो पेक्खह। वाउणो पेक्ख॥

In nouns ending in इ and उ, णो is substituted for शस्...

॥ ङसो वा ॥ १५ ॥

इदुदन्तयोर्ङसो वा णो भवति ॥ अग्गिणो अग्गिस्स ॥ वाउणो। वाउस्स ॥ अग्नेः । वायोः ॥

In nouns ending in इ and उ, णो is optionally substituted for ङस् ......

॥ जसश्च ओ यूत्वं ॥ १६ ॥

इदुदन्तयोर्जस ओकारादेशो भवति। इदुतोश्च ईऊत्वं वा। चकाराद् णो च ॥ अग्गीओ । वाऊओ ॥ अग्गिणो । वाउणो ॥

In nouns ending in इ and उ, ओ is substituted for जस्, and ई and ऊ for the final इ and उ. From the use of the word च in the sūtra we infer that णो is also used for जस्....

॥ टा णा ॥ १७ ॥

इदुदन्तयोष्टाविभक्तेः णा इत्ययमादेशो भवति ॥ अग्गिणा । वाउणा ॥

In nouns ending in इ and उ, णा is substituted for the affix टा......

॥ सुभिस्सुप्सु दीर्घः ॥ १८ ॥

इदुदन्तयोः सु भिस् सुप् इत्येतेषु दीर्घो भवति ॥

सु ॥ अग्गी । वाऊ ॥ भिस् ॥ अग्गीहिं । वाऊहिं ॥ सुप् ॥ अग्गीसु । वाऊसु ॥

The ending इ and उ of nouns are lengthened before सु, भिस् and सुप्......

॥ स्त्रियां शस उदोतौ ॥ १९ ॥

स्त्रियां वर्तमानस्य शस उत् ओत् इत्येतावादेशौ भवतः ॥ मालाउ मालाओ । णईउ णईओ । वहूउ वहूओ ॥

In feminine nouns उ and ओ are substituted for शस्......

॥ जसो वा ॥ २० ॥

जसः स्त्रियां उत् ओत् इत्येतावादेशौ वा भवतः ॥ पक्षे अदन्तवत् ॥ मालाउ । मालाओ । माला ॥

In feminine nouns उ and ओ are optionally substituted for जस्. In the alternative these follow the rule of nouns ending in अ......

॥ अमि ह्रस्वः ॥ २१ ॥

अमि परतः स्त्रियां ह्रस्वो भवति ॥ मालं । णइं ॥ वहुं ॥

In feminine nouns the final long vowel is shortened before अम्......

॥ टाङस्ङीनामिदेददातः ॥ २२ ॥

टा ङस् ङि इत्येतेषां स्त्रियां इत् एत् अत् आत् इत्येत आदेशा भवन्ति ॥

टा ॥ णईइ । णईए । णईअ । णईआ कअं ॥ ङस् ॥ णईइ । णईए । णईअ । णईआ वणं ॥ ङि ॥ णईइ । णईए । णईअ । णईआ ठिअं ॥

In feminine nouns इ, ए, अ and आ are substituted for टा ङस्, ङि....

॥ नातोऽदातौ ॥ २३ ॥

आत आकारान्तस्य स्त्रीलिंगस्यानन्तरं टाङस्ङीनां अत् आत् इत्येतावादेशौ न भवतः । पूर्वेण प्राप्ते निषिध्यते ॥ मालाइ मालाए ।

In the case of feminine nouns ending in आ, अ and आ of the above substitutes are not used: *i. e.*, the legitimate application of the preceding sūtra is prohibited......

॥ आदीतौ बहुलम् ॥ २४ ॥

स्त्रियामाकारान्तादातः स्थाने आत् ईत् इत्येतौ बहुलं प्रयोक्तव्यौ ॥ सहमाणा सहमाणी । हलदा हलदी । सुप्पणहा सुप्पणही । छाहा छाही ॥

In feminine words ending in आ, आ and ई are irregularly interchanged as the final letter......

॥ न नपुंसके ॥ २५ ॥

प्रथमैकवचने नपुंसके दीर्घत्वं न भवति। सौ दीर्घः पूर्वस्ये-त्यनेन इदुदन्तयोः प्राप्तं पूर्वस्य दीर्घत्वं न नपुंसके इत्यनेन बाध्यते॥ दहिं। महुं। हविं॥ दधि। मधु। हविः॥

The final vowel is not lengthened in the nom. sing. of a neuter noun. ( In nouns ending in अ there is no rule which would enjoin it;) but those ending in इ and उ, might have come within the range of sūtra 18, if the prohibition by this rule did not exist....

॥ इञ्जश्शसोर्दीर्घश्च ॥ २६ ॥

नपुंसके वर्तमानयोर्जश्शसोः स्थाने इदादेशो भवति पूर्वस्य च दीर्घः॥ वणाइ। दहीइ। महूइ॥

In neuter nouns इ is substituted for जस् and शस्, and the preceding vowel is lengthened......

॥ नामन्त्रणे सावोत्वदीर्घबिन्दवः ॥ २७॥

आमन्त्रणे गम्यमाने सौ परत ओत्वदीर्घबिन्दवो न भवन्ति। अत ओत्सोरित्योत्वं प्राप्तम्। सुभिस्सुप्सु दीर्घ इति दीर्घः। सोर्बिन्दुर्नपुंसक इति बिन्दुः प्राप्तः॥ हे वच्छ। हे अग्गि। हे वाउ। हे वण। हे दहि। हे महु॥

When the nom. sing. is used in the sense of the vocative, neither ओ ( by sūtra 1 ) nor the long vowel ( by sūtra 18 ) nor the अनुस्वार ( by sūtra 30 ) are allowed......

॥ स्त्रियामात एत् ॥ २८ ॥

स्त्रियामामन्त्रणे आतः स्थाने एत्वं भवति सौ परतः॥ हे माले। हे साले॥ अन्त्यस्य हल इति सोर्लोपः॥

In the vocative of feminine nouns, ए is substituted for आ before the affix सु......The commentator remarks that

सु is elided by iv. 6. which enjoins the elision of every final consonant.

॥ ईदूतोर्ह्रस्वः ॥ २९ ॥

आमन्त्रणे ईदूतोर्ह्रस्वो भवति ॥ हे णइ । हे वहु ॥

In the vocative the final ई and ऊ are shortened...

॥ सोर्बिन्दुर्नपुंसके ॥ ३० ॥

नपुंसके वर्तमानस्य सोर्बिन्दुर्भवति ॥ वणं । दहिं । महुं ॥

In neuter nouns अनुस्वार is substituted for the affix of the nom. sing.......

॥ ऋत आरः सुपि ॥ ३१ ॥

ऋकारन्तस्य सुपि परत आर इत्यादेशो भवति ॥ भत्तारो सोहइ । भत्तारं पेक्खसु । भत्तारेण कअं ॥

In words ending in ऋ, आर is substituted for ऋ before all case-affixes ( सुप् प्रत्याहार )......

॥ मातुरात् ॥ ३२ ॥

मातृसंबन्धिन ऋकारस्याकारो भवति ॥ माआ सोहइ । माअं पेक्खसु । माआइ कअं । माआए ॥

आ is substituted for the ऋ of मातृ ( and the word is then declined like other feminine nouns ending in आ )......

॥ उर्जश्शस्टाङस्सुप्सु वा ॥ ३३ ॥

जश्शस्टाङस्सुप्सु परत ऋकारस्य स्थाने उकारादेशो भवति वा ॥

जस् । भत्तुणो भत्तारा ॥ शस् । भत्तुणो भत्तारे ॥ टा । भत्तुणा भत्तारेण ॥ ङस् । भत्तुणो भत्तारस्स ॥ सुप् । भत्तूसु भत्तारेसु ॥ आरादिः पूर्ववत् ॥

उ is optionally substituted for a final ऋ, before the affixes जस्, शस्, टा, ङस् and सु ( *i. e.*, in these cases, words ending in ऋ becomes subject to the same rules as those ending originally in उ.)......

॥ पितृभ्रातृजामातॄणामरः ॥ ३४ ॥

पित्रादीनां सुपि परत ऋतोऽरो भवति । आरापवादः ॥ पिअरं पिअरेण । भाअरं भाअरेण । जामाअरं जामाअरेण ॥

In the words पितृ, भ्रातृ and जामातृ, अर is substituted for the final ऋ before all case-affixes; आर is thus forbidden...

॥ आ च सौ ॥ ३५ ॥

पित्रादीनामाकारो भवति सौ परतः ॥ चकारादरश्च ॥ पिआ पिअरो । भाआ भाअरो । जामाआ जामाअरो ॥

In these words आ is substituted for the nom. sing. affix ; from the use of च in the sūtra we infer that अर is also used......

॥ राज्ञश्च ॥ ३६ ॥

राजनशब्दस्य आ इत्ययमादेशो भवति सौ परतः ॥ राआ ॥

आ is substituted for the ending अन् of राजन् before the affix of the nom. sing......

आमन्त्रणे वा बिन्दुः ॥ ३७ ॥

राजनशब्दस्य आमन्त्रणे वा बिन्दुः स्यात् ॥ हे राअं । हे राअ ॥

In the vocative अनुस्वार is optionally substituted for the ending consonant of the word राजन्......

॥ जश्शस्ङस्सां णो ॥ ३८ ॥

राज्ञ उत्तरेषां जस् शस् ङस् इत्येतेषां णो इत्ययमादेशो भवति ॥ राआणो पेक्खंति । राआणो पेक्ख । राइणो धणं । रण्णो धणं ॥

णो is substituted for जस्, शस् and ङस् after the word राजन्......

॥ शस एत् ॥ ३९ ॥

राज्ञः परस्य शस ए इत्ययमादेशो भवति ॥ राए पेक्ख । राआणो पेक्ख ॥

ए is substituted for शस् after राजन् (in addition to ण्णे enjoined by the previous sūtra)......

|| आमो णं || ४० ||

राज्ञ उत्तरस्यामः षष्ठीबहुवचनस्य णं इत्ययमादेशो भवति || राआणं ||

णं is substituted for आम्, genitive sing. affix after राजन्.

|| टा णा || ४१ ||

राज्ञ उत्तरस्याः टाविभक्तेः णा इत्ययमादेशः स्यात् || राइणा ||

णा is substituted for टा after राजन्......

|| ङसश्च द्वित्वं वान्त्यलोपश्च || ४२ ||

राज्ञ उत्तरस्य ङसादेशस्य टादेशस्य च वा विकल्पेन द्वित्वं भवति । अन्त्यस्य च लोपः || रण्णो राइणो धणं || राइणा रण्णा कअं ||

णो and णा as substitutes for ङस् and टा are optionally doubled after राजन्; and then the ending न् of the word is elided......

|| इदद्वित्वे || ४३ ||

वेति निवृत्तम् । ङसादेशस्य टादेशस्य च अकृते द्वित्वे राज्ञ इत्वं भवति || राइणो राइणा । कृते द्वित्वे त्वित्वं न भवति|| रण्णो रण्णा ||

When the substitutes for टा and ङस् are not doubled, इ is substituted for the अन् of राजन् ...When they are doubled, इ is not substituted......

[|| आ णोणमोरङसि || ४४ ||]

णोणमोः परयोः राज्ञो जकारस्य आकारादेशः स्यात् । अङसि षष्ठ्येकवचने न भवति || राआणो पेक्खंति । राआणो पेक्ख । राआणं धणं || अङसीति किम् || राइणो रण्णो धणं || शेषमदन्तवत् || राअं । राएहिं । राआ राआदो राआदु । राआहिंतो राआसुंतो ।

राअम्मि राए राएसु ॥ राजानम् । राजभिः । राज्ञः । राजभ्यः । राज्ञि । राजसु ॥

Before णो and णं, the ज of राजन् is substituted by आ, except before णो of the genitive sing...... Why do we make the exception of ङस् ? Because we have राइणो and रण्णो... The rest of the declension is similar to words ending in अ...

॥ आत्मनोऽप्पाणो वा ॥ ४५ ॥

आत्मनोऽप्पाण इत्यादेशो भवति वा । अप्पा । अप्पाणो ॥

अप्पाण is optionally substituted for आत्मन्......

[ ॥ इत्वं द्वित्ववर्जं राजवदनादेशे ॥ ४६ ॥ ]

आत्मनोऽनादेशे राजवत् कार्यं स्यादित्वद्वित्वे वर्जयित्वा ॥ अप्पा । अप्पाणो । अप्पणा । अप्पणो ॥ आत्मा । आत्मानः । आत्मना । आत्मनः ॥

When अप्पाण is not substituted for आत्मन्, it should be declined like राजन्; इ is not, however, substituted for the ending अन्, as enjoined by sūtra 43, nor णो and णा doubled as required by sūtra 42.......

॥ ब्रह्माद्या आत्मवत् ॥ ४७ ॥

ब्रह्माद्याः शब्दा लक्ष्यानुसारेणात्मवत् साधवो भवन्ति ॥ बम्हा बम्हाणो ॥ जुवा जुवाणो । अद्धा अद्धाणो ॥ ब्रह्मन् । युवन् । अध्वन् ॥ एवमादयो लक्ष्यानुसारेणानुगन्तव्याः ॥

The words ब्रह्मन् etc., are declined like आत्मन्......other similar instances are to be determined from usage......

॥ इति वररुचिकृते प्राकृतप्रकाशे लिंगविभक्त्यादेशः पञ्चमः परिच्छेदः ॥

## ॥ अथ षष्ठः परिच्छेदः ॥

॥ सर्वादेर्जस एत्वम् ॥ १ ॥

सर्वादेरुत्तरस्य जस एत्वं भवति ॥ सव्वे । जे । ते । के । कदरे ॥ सर्वे । ये । ते । के । कतरे ॥

जस् becomes ए, when it follows the class of words called सर्वादि ( *i. e.*, pronouns )......

॥ ङेः स्सिम्मित्थाः ॥ २ ॥

ङेः सप्तम्येकवचनस्य सर्वादिपरस्थितस्य स्थाने स्सिं म्मि त्थ इत्येत आदेशा भवन्ति । सव्वस्सिं । सव्वम्मि । सव्वत्थ ॥ इअरस्सिं । इअरम्मि इअरत्थ ॥ सर्वस्मिन् । इतरस्मिन् ॥

स्सिं, म्मि and त्थ are substituted for ङि, the affix of the loc. sing. when following a pronoun .....

॥ इदमेतत्किंयत्तद्भ्यष्टा इणा वा ॥ ३ ॥

इदं । एतत् । किं । यत् । तत् । इत्येतेभ्यः टा इत्यस्य इणादेशो भवति वा ॥ इमिणा । एदिणा । किणा । जिणा । तिणा । पक्षे । इमेण । एदेण । केण । जेण । तेण ॥ अनेन । एतेन । केन । येन । तेन ॥

इणा is optionally substituted for टा after इदम्, एत त्, किम् यत् and तत्......

॥ आम एसिं ॥ ४ ॥

इदमादिभ्य उत्तरस्य आम एसिं इत्ययमादेशो वा भवति ॥ इमेसिं इमाण । एदेसिं एदाण । केसिं काण । जेसिं जाण । तेसिं ताण ॥

एसिं is optionally substituted for आम after इदम् etc......

॥ किंयत्तद्भ्यो ङस आसः ॥ ५ ॥

किं । यत् । तत् । एभ्य उत्तरस्य ङस आस इत्ययमादेशो भवति वा ॥ कास । कस्स ॥ जास जस्स ॥ तास । तस्स ॥

आस is optionally substituted for ङस्, after the pronouns किम्, यत् and तत् .....

इद्भ्यः स्सा से ॥ ६ ॥

इकारान्तेभ्यः किमादिभ्य उत्तरस्य ङसः स्सा से इत्येतावादेशौ भवतः ॥ किस्सा । कीसे । कीआ । कीए । कीअ । कीइ ॥ जिस्सा । जीसे । जीआ । जीए । जीअ । जीइ ॥ तिस्सा । तीसे । तीआ । तीए । तीअ । तीइ ॥

स्सा से are substituted for ङस्, after the above-mentioned pronouns when they are declined like nouns ending in इ ( *i. e.*, in the feminine )......

॥ ङेर्हिं ॥ ७ ॥

किमादिभ्य उत्तरस्य ङेः हिं इत्ययमादेशो भवति वा ॥ कहिं । कस्सिं । कम्मि । कत्थ ॥ जहिं । जस्सिं । जम्मि । जत्थ ॥ तहिं ॥ तस्सिं । तम्मि । तत्थ ॥

हिं is optionally substituted for ङि after the above mentioned pronouns......

॥ आहे इआ काले ॥ ८ ॥

किंयत्तद्भ्यो ङेः काले आहे इआ इत्यादेशौ वा भवतः ॥ काहे । जाहे । ताहे ॥ कइआ । जइआ । तइआ ॥ कहिं इत्यादयोऽपि ॥ कदा । यदा । तदा ॥

Instead of ङि in the sense of time, आहे and इआ are optionally substituted after the above pronouns......And also other forms कहिं etc.......

॥ त्तो दो ङसेः ॥ ९ ॥

किंयत्तद्भ्यो ङसेः त्तो दो इत्येतावादेशौ भवतः ॥ कत्तो । कदो ॥ जत्तो । जदो ॥ तत्तो । तदो ॥

Instead of ङसि, त्तो and दो are substituted after the above pronouns.......

॥ तद ओश्च ॥ १० ॥

तद उत्तरस्य ङसेरोकारादेशो भवति वा ॥ तो । तत्तो । तदो ॥

Instead of ङसि, after the pronoun तद्, ओ is optionally substituted......

॥ ङसा से ॥ ११ ॥

वेति वर्तते । तदो ङसा सह से इत्ययमादेशो भवति ॥ पक्षे यथाप्राप्तम् ॥ से । तास । तस्स ॥

The option allowed in the preceding sūtra still continues. से is optionally substituted for the pronoun तद् together with ङस्; in the alternative it follows previous rules......

॥ आमा सिं ॥ १२ ॥

तद आमा सह सिं इत्ययमादेशो वा भवति ॥ सिं । ताण ॥ तेषाम् तासाम् ॥

सिं is optionally substituted for the pronoun तद् together with आम्......

॥ किमः कः ॥ १३ ॥

किंशब्दस्य सुपि परतः क इत्ययमादेशो भवति ॥ को । के । केण । केहिं ॥

क is substituted for the pronoun किम् when followed by the affixes of declension......

॥ इदम इमः ॥ १४ ॥

सुपि परत इदम इम इत्ययमादेशो भवति ॥ इमो । इमे । इमं । इमेण । इमेहिं ॥

इम is substituted for इदम when followed by the affixes of declension......

॥ स्सस्सिमोरद्वा ॥ १५॥

स्सस्सिमोः परत इदमोऽदादेशो वा भवति ॥ अस्स । इमस्स ॥ अस्सिं इमास्सिं ॥

अ is optionally substituted for इदम् when followed by स्स and स्सिं......

॥ ङेर्देन हः ॥ १६ ॥

इदमो दकारेण सह ङेः स्थाने हकारादेशो वा भवति ॥ इह ॥ पक्षे । आस्सिं । इमास्सिं । इमम्मि ॥

ह is optionally substituted for ङि together with the द of इदम्...In the alternative we have अस्सिं etc......

॥ न त्थः ॥ १७ ॥

इदमः परस्य ङेः त्थ इत्ययमादेशो न भवति ॥ ङेः स्सिंम्मित्था इति प्राप्ते प्रतिषिध्यते ॥ इह । अस्सिं । इमास्सिं । इमम्मि ॥

The form त्थ is not used as a substitute for ङि, when it follows इदम्, and thus the sūtra 2 is so far restricted from applying to this pronoun ...

॥ नपुंसके स्वमोरिदमिणमिणमो ॥ १८ ॥

नपुंसकलिंगे इदमः स्वमोः परतः सविभक्तिकस्य इदं इणं इणमो इत्येते त्रय आदेशा भवन्ति ॥ इदं । इणं । इणमो धणं ॥

Instead of इदम्, in the neuter gender, together with सु and अम् we have इदं, इणं and इणमो.

॥ एतदः सावोत्वं वा ॥ १९ ॥

एतच्छब्दस्य सौ परत ओत्वं वा भवति ॥ नित्ये प्राप्ते विकल्प्यते ॥ एस । एसो ॥ एषः ॥

Whe the pronoun एतद् is followed by सु, the substitution of ओ for सु ( which by v. 1 is universal ) is only optional......

॥ त्तो ङसेः ॥ २० ॥

एतदः परस्य ङसेः त्तो इत्ययमादेशो भवति ॥ एत्तो। एदादो। एदादु । एदाहि ॥ एतस्मात् ॥

त्तो is substituted for ङसि after the pronoun एतद्......

॥ त्तोत्थयोस्तलोपः ॥ २१ ॥

एतदस्तकारस्य त्तोत्थयोः परतो लोपो भवति ॥ एत्तो । एत्थ ॥

The त of एतद् is elided when it is followed by त्तो and त्थ......

॥ तदेतदोः सः सावनपुंसके ॥ २२ ॥

तच्छब्दस्य एतच्छब्दस्य यस्तकारः तस्य सकारादेशो भवति अनपुंसके सौ परतः ॥ सो पुरिसो । सा महिला । एस। एसो। एसा ॥ साविति किम् ॥ एदे। ते । एदं । तं ॥ अनपुंसक इति किम् ॥ तं एदं वणं ॥

स is substituted for त of तद् and एतद् in the masculine and feminine before सु...Why do we specify सु ? Because it does not hold good in the nom. plural, एते and ते...Why do we exclude the neuter ? Because we have तं and एतं in the neuter nom. sing.......

॥ अदसो दो मुः ॥ २३ ॥

अदसो दकारस्य सुपि परतो मु इत्ययमादेशो भवति ॥ अमू पुरिसो । अमू महिला । अमूओ पुरिसो । अमूओ महिलाओ । अमुं वणं । अमूइं वणाइं ॥

मु is substituted for द of the pronoun अदस् before the case-affixes ( the final स् being already dropped by iv. 6 ), and then the word is declined like a noun ending in उ......

॥ ह्श्च सौ ॥ २४ ॥

अदसो दकारस्य सौ परतो हकारादेशो भवति ॥ अह पुरिसो । अह महिला । अह वणं ॥ हादेशोऽयमोत्वात्वबिन्दून् त्रिष्वपि लिंगेषु परत्वाद्बाधते ॥

ह is also substituted for the द of अदस् before the affix of the nom. sing...... This ह does not admit ओ, आ or अनुस्वार, and therefore remains the same in the three genders.

॥ पदस्य ॥ २५ ॥

अधिकारोऽयम् । आशब्दविधानात् । यदित ऊर्ध्वमनुक्रमिष्यामः पदस्य तद्भवतीत्येवं वेदितव्यम् । तच्च तत्रैवोदाहरिष्यामः ॥

This sūtra is an अधिकार; it will extend until a शब्द is enjoined which we shall specify when it occurs. The various rules which we shall state henceforward, are to be understood as supplying substitutes for a पद (*i. e.*, the crude word and the case-affix taken together.)

॥ युष्मदस्तं तुमं ॥ २६ ॥

सावित्येव । युष्मदः पदस्य सौ परतः तं तुमं इत्येतावादेशौ भवतः ॥ तं आगदो । तुमं आगदो ॥

The affix सु is repeated from sūtra 24. तं and तुमं are substituted for the pada युष्मद् followed by सु......

॥ तुं चामि ॥ २७ ॥

युष्मदः पदस्य अमि परतः तुं इत्यादेशो वा भवति । तुमं च ॥ तुं पेक्खामि । तुमं पेक्खामि ॥

For the pada युष्मद् followed by अम्, तुं ( and also तुमं by the preceding sūtra ) is substituted...

॥ तुज्झे तुम्हे जसि ॥ २८ ॥

युष्मदः पदस्य जसि परतः तुज्झे तुम्हे इत्येतावादेशौ भवतः ॥ तुज्झे आगदा । तुम्हे आगदा ॥

For the pada युष्मद् followed by जस्, तुज्झे and तुम्हे are substituted.......

॥ वो च शसि ॥ २९ ॥

शसि युष्मदः पदस्य वो इत्यादेशो भवति । चकारात् तुज्झे तुम्हे च ॥ वो पेक्खामि ॥ तुज्झे तुम्हे पेक्खामि ॥

For the pada युष्मद् followed by शस्, वो is substituted. By the use of च in the sūtra we have तुज्झे and तुम्हे also......

॥ टाङ्योस्तइ तए तुमए तुमे ॥ ३० ॥

युष्मदुत्तरयोः टा ङि इत्येतयोः तइ तए तुमए तुमे इत्येत आदेशा भवन्ति ॥ टा ॥ तइ तए तुमए तुमे कअं ॥ ङि ॥ तइ तए तुमए तुमे ठिअं ॥

For the pada युष्मद् followed by टा and ङि, तइ, तए, तुमए and तुमे are substituted...

॥ ङसि तुमोतुहतुज्झतुम्हतुम्भाः ॥ ३१ ॥

युष्मदः पदस्य ङसि तुमो तुह तुज्झ तुम्ह तुम्भ इत्येत आदेशा भवन्ति ॥ तुमो पदं । तुह तुज्झ तुम्ह तुम्भ पदं ॥

For the pada युष्मद् followed by ङसि, तुमो, तुह, तुज्झ, तुम्ह, तुम्भ are substituted...

॥ आङि च ते दे ॥ ३२ ॥

आङि तृतीयैकवचने चकाराद् ङसि च परतो युष्मदः पदस्य ते दे इत्येतावादेशौ भवतः ॥ ते कअं । दे कअं ॥ ते धणं । दे धणं ॥

For the pada युष्मद् followed by आङ् the affix of the instr. sing. and also ङस् (which we infer from च in the sūtra) ते and दे are substituted...

॥ तुमाइ च ॥ ३३ ॥

आङि युष्मदः पदस्य तुमाइ इत्ययमादेशो भवति ॥ तुमाइ कअं॥

For the pada युष्मद् followed by आङ, तुमाइ is also substituted...

॥ तुज्झेहिं तुम्हेहिं तुम्भेहिं भिसि ॥ ३४ ॥

भिसि परतो युष्मदः पदस्य तुज्झेहिं तुम्हेहिं तुम्भेहिं इत्येत आदेशा भवन्ति ॥ तुज्झेहिं तुम्हेहिं तुम्भेहिं कअं ॥

For the pada युष्मद् followed by भिस्, तुज्झेहिं, तुम्हेहिं and तुम्भेहिं are substituted...

॥ ङसौ तत्तो तइत्तो तुमादो तुमादु तुमाहि ॥ ३५ ॥

ङसौ परतो युष्मदः पदस्य तत्तो तइत्तो तुमादो तुमादु तुमाहि इत्येत आदेशा भवन्ति ॥ तत्तो आगदो । तइत्तो तुमादो तुमादु तुमाहि आगदो ॥ त्वदागतः ॥

For the pada युष्मद् followed by ङसि, तत्तो etc., are substituted...

तुम्हाहिंतो तुम्हासुंतो भ्यसि ॥ ३६ ॥

युष्मदः पदस्य पञ्चमीबहुवचने भ्यसि तुम्हाहिंतो तुम्हासुंतो इत्येतावादेशौ भवतः ॥ तुम्हाहिंतो तुम्हासुंतो आगदो ॥

For the pada युष्मद् followed by भ्यस्, तुम्हाहिंतो and तुम्हासुंतो are substituted...

॥ वो भे तुज्झाणं तुम्हाणमामि ॥ ३७ ॥

आमि परतो युष्मदः पदस्य वो भे तुज्झाणं तुम्हाणं इत्येत आदेशा भवन्ति ॥ वो धणं । भे धणं । तुज्झाणं तुम्हाणं धणं ॥

For the pada युष्मद् followed by आम्, वो, भे etc., are substituted...

|| ङौ तुमम्मि || ३८ ||

युष्मदः पदस्य ङौ परतः तुमम्मि इत्यादेशो भवति ।। तुमम्मि ठिअं ।। पूर्वोक्ताश्च तइप्रभृतयश्चत्वारोऽप्यादेशा भवन्ति ।।

For the pada युष्मद् followed by ङि, तुमम्मि is substituted. By sūtra 30 we have also तइ etc...

|| तुज्झेसु तुम्हेसु सुपि || ३९ ||

युष्मदः पदस्य सप्तमीबहुवचने तुज्झेसु तुम्हेसु इत्येतावादेशौ भवतः ।। तुज्झेसु ठिअं । तुम्हेसु ठिअं ।।

For the pada युष्मद् followed by सुप्, तुज्झेसु and तुम्हेसु are substituted...

|| अस्मदो हमहमहअं सौ || ४० ||

अस्मदः पदस्य सौ परतो हं अहं अहअं इत्येत आदेशा भवन्ति।। हं अहं अहअं करेमि ।।

For the pada अस्मद् followed by सु, हं, अहं and अहअं are substituted...

|| अहम्मिरमि च || ४१ ||

अमि परतोऽस्मदः पदस्य अहम्मि इत्ययमादेशो भवति । सौ च ।। अहम्मि पेक्ख । अहम्मि करेमि ।। मां प्रेक्षस्व । अहं करोमि ।।

For the pada अस्मद् followed by अम्, अहम्मि is substituted, and from the च of the sūtra we infer that it may also be similarly substituted for the nom. sing.......

|| मं ममं || ४२ ||

अमीति वर्तते । अस्मदः पदस्य अमि परतो मं ममं इत्येतावादेशौ भवतः ।। मं ममं पेक्ख ।।

For the pada अस्मद् followed by अम्, मं and ममं are substituted......

अम्हे जश्शसोः ॥ ४३ ॥

अस्मदः पदस्य जश्शसोः परतः अम्हे इत्ययमादेशो भवति ॥ अम्हे आगदा। अम्हे पेक्ख ॥

For the pada अस्मद् followed by जस् and शस्, अम्हे is substituted.......

॥ णो शसि ॥ ४४ ॥

अस्मदः पदस्य शसि परतो णो इत्ययमादेशो भवति ॥ णो पेक्ख ॥ अस्मान् प्रेक्षस्व ॥

For the pada अस्मद् followed by शस्, णो is substituted...

॥ आङि मे ममाइ ॥ ४५ ॥

अस्मदः पदस्य आङि परतो मे ममाइ इत्येतावादेशौ भवतः ॥ मे कअं। ममाइ कअं ॥

For the pada अस्मद् followed by आङ्, मे and ममाइ are substituted......

॥ ङौ च मइ मए ॥ ४६ ॥

अस्मदः पदस्य ङौ परतो मइ मए इत्येतावादेशौ भवतः। चकारात्तृतीयैकवचने च ॥ मइ मए ठिअं। मइ मए कअं ॥

For the pada अस्मद् followed by ङि, मइ and मए are substituted. By the use of the word च in the sūtra we infer that these substitutes are also used in the instr. sing .....

॥ अम्हेहिं भिसि ॥ ४७ ॥

अस्मदः पदस्य भिसि अम्हेहिं इत्ययमादेशो भवति ॥ अम्हेहिं कअं ॥

For the pada अस्मद् followed by भिस्, अम्हेहिं is substituted.......

॥ मत्तो मइत्तो ममादो ममादु ममाहि ङसौ ॥ ४८ ॥

अस्मदः पदस्य ङसौ परत एत आदेशा भवन्ति ॥ मत्तो गदो । मइत्तो । ममादो ममादु ममाहि गदो ॥

For the pada अस्मद् followed by ङसि, मत्तो etc., are substituted...

॥ अम्हाहिंतो अम्हासुंतो भ्यसि ॥ ४९ ॥

अस्मदः पदस्य भ्यसि परत अम्हाहिंतो अम्हासुंतो इत्येतावादेशौ भवतः ॥ अम्हाहिंतो अम्हासुंतो गदो ॥

For the pada अस्मद् followed by भ्यस्, अम्हाहिंतो and अम्हासुंतो are substituted...

॥ मे मम मह मज्झ ङसि ॥ ५० ॥

अस्मदः पदस्य ङसि परत एत आदेशा भवन्ति ॥ मे धणं । मम मह मज्झ धणं ॥

For the pada अस्मद् followed by ङस्, मे, मम, मह and मज्झ are substituted...

॥ मज्झ णो अम्ह अम्हाणमम्हे आमि ॥ ५१ ॥

अस्मदः पदस्य आमि परत एत आदेशा भवन्ति ॥ मज्झ णो अम्ह अम्हाणं अम्हे धणं ॥ अस्माकं धनं ॥

For the pada अस्मद् followed by आम्, मज्झ etc., are substituted ..

॥ ममम्मि ङौ ॥ ५२ ॥

अस्मदः पदस्य ङौ परतो ममम्मि इत्यादेशो भवति ॥ ममम्मि ठिअं ॥ पूर्वोक्तौ मइ मए इत्येतौ च ॥

For the pada अस्मद् followed by ङि, ममम्मि is substituted, as also मइ and मए enjoined by sūtra 46.

अम्हेसु सुपि ॥ ५३ ॥

अस्मदः पदस्य सप्तमीबहुवचने सुपि परतः अम्हेसु इत्ययमादेशो भवति ॥ अम्हेसु ठिअं ॥

For the pada अस्मद् followed by सुप्, the affix of the loc. sing., अम्हेसु is substituted...

॥ द्वेर्दो ॥ ५४ ॥

पदस्येति निवृत्तम् । सुपीति वर्तते ॥ द्विशब्दस्य दो इत्ययमादेशो भवति सुपि परतः ॥ दोहिं । दोसु ॥ द्वाभ्यां । द्वयोः ॥

The अधिकार of पद. ends here. सुपि of the preceding sūtra is implied here ( but the sense is. not सुप of the loc. plural. but सुप् प्रत्याहार, all case-affixes). For the word द्वि. दो is substituted before the case affixes......

॥ त्रेस्तिः ॥ ५५ ॥

त्रिशब्दस्य सुपि परतः ति इत्यादेशो भवति ॥ तीहिं । तीसु ॥ त्रिभिः । त्रिषु ॥

For the word त्रि, ति is substituted before the case-affixes......

तिण्णि जश्शस्भ्याम् ॥ ५६ ॥

त्रिशब्दस्य जश्शस्भ्यां सह तिण्णि इत्यादेशो भवति ॥ तिण्णि आगदा । तिण्णि पेक्ख ॥ त्रय आगताः । त्रीन्प्रेक्षस्व ॥

तिण्णि is substituted for त्रि together with जस् and शस्...

॥ द्वेर्दुवे दोण्णि वा ॥ ५७ ॥

द्विशब्दस्य जश्शस्भ्यां सह दुवे दोण्णि इत्येतावादेशौ भवतः ॥ दुवे कुणंति । दोण्णि कुणंति ॥ पक्षे दो कुणंति ॥ द्वौ कुरुतः ॥ दुवे पेक्खे । दोण्णि पेक्ख । पक्षे दो पेक्ख ॥ द्वौ प्रेक्षस्व ॥

दुवे and दोण्णि are optionally substituted for द्वि together with जस् and शस्...... In the alternative we have दो......

॥ चतुरश्चत्तारो चत्तारि ॥ ५८ ॥

चतुर्शब्दस्य जश्शस्भ्यां सह चत्तारो चत्तारि इत्येतावादेशौ भवतः ॥ चत्तारो चत्तारि पुरिसा कुणंति । चत्तारो चत्तारि पुरिसे पेक्ख ॥

For the word चतुर् together with जस् and शस्, चत्तारो and चत्तारि are substituted......

॥ एषामामो ण्हं ॥ ५९ ॥

एषां द्वित्रिचतुःशब्दानामामः स्थाने ण्हं इत्ययमादेशो भवति ॥ दोण्हं धणं । तिण्हं धणं । चउण्हं धणं ॥

Instead of आम्, we have ण्हं after द्वि, त्रि and चतुर्......

॥ शेषोऽन्दत्तवत् । ६० ॥

शेषः सुप्विधिरदन्तवद्भवति । अकारान्ताद् भिसो हिं इत्ययमादेश उक्त इकारोकारान्तादपि भवति । अग्गीहिं वाऊहिं । एवं मालाहिं गईहिं वहूहिं । अग्गिस्स वाउस्स । अग्गीदो । वाऊदो । अग्गीदु । वाऊदु । एवं दोहिं तीहिं चऊहिं ॥

The rest of the rules of declension are the same as those for words ending in अ. Thus the sūtra भिसो हिं is applicable to words ending in इ and उ.......

॥ न ङिङस्योरेदातौ ॥ ६१ ॥

इकारोकारान्तानां ङिङस्योरदन्तवद् एकाराकारौ न भवतः ॥ अग्गिम्मि वाउम्मि । अग्गीदो वाऊदो । अग्गीदु वाऊदु । अग्गीहि वाऊहि ॥

ए and आ are not used as substitutes for ङि and ङसि, after words ending in इ and उ, as they are in the case of nouns ending in अ......

॥ ए भ्यसि ॥ ६२ ॥

नेत्यनुवर्तते। भ्यसि परत इकारोकारान्तयोरदन्तवदेत्वं न भवति॥ अग्गीहिंतो बाऊहिंतो ॥ अग्गीसुंतो । वाऊसुंतो ॥

The word न is repeated from the previous sūtra. The ending इ and उ are not changed to ए as the ending अ of a word is, before भ्यस्......

॥ द्विवचनस्य बहुवचनम् ॥ ६३ ॥

सर्वासां विभक्तीनां सुपां तिङां च द्विवचनस्य बहुवचनं प्रयोक्तव्यम् ॥ वृक्षौ । वच्छा॥ वृक्षाभ्यां । वच्छेहिं। वच्छाहिंतो॥ वृक्षयोः। वच्छाण । वच्छेसु ॥

तिङो यथा ॥ तिष्ठतः । चिट्ठंति ॥

In all affixes, whether for the cases of nouns or the persons of verbs, we must use the plural instead of the dual...

॥ चतुर्थ्याः षष्ठी ॥ ६४ ॥

चतुर्थीविभक्तेः स्थाने षष्ठीविभक्तिर्भवति ॥ बह्मणस्स देहि । बह्मणाण देहि ॥ ब्राह्मणाय देहि । ब्राह्मणेभ्यो देहि ॥

Instead of the affix of the dative case, we must use that of the genitive...

॥ इति वररुचिकृते प्राकृतप्रकाशे सर्वनामपरिच्छेदः षष्ठः ॥

## ॥ अथ सप्तम परिच्छेदः ॥

॥ तत्तिपोरिदेतौ ॥ १ ॥

त तिप् इत्येतयोरेकैकस्य स्थाने इत् एत् इत्येतावादेशौ भवतः॥ पढइ पढए । सहइ सहए ॥ पठति पठते । सहति सहते ॥

For त and तिप् (the affixes of the third person sing. in the आत्मनेपद and the परस्मैपद) इ and ए are mutually substituted...

॥ थास्सिपोः सि से ॥ २ ॥

थास् सिप् इत्येतयोरेकैकस्य स्थाने सि से इत्येतावादेशौ भवतः॥ पढसि पढसे। सहसि सहसे॥

For थास् and सिप् (the affixes of the second person sing. in the आत्मनेपद and the परस्मैपद) सि and से are mutually substituted...

॥ इट्मिपोर्मिः ॥ ३ ॥

इट् मिप् इत्येतयोः स्थाने मिर्भवति॥ पढामि। हसामि। सहामि॥

For इट् and मिप् (the affixes of the first person. sing. in the आत्मनेपद and परस्मैपद) मि is substituted...

॥ न्तिहेत्थामोमुमा बहुषु ॥ ४ ॥

बहुषु वर्तमानानां लिङां स्थाने न्ति, ह इत्था, मो मु म इत्येत आदेशा भवन्ति॥ प्रथमपुरुषस्य। हसंति। पढंति। हसंति॥ मध्यमस्य॥ रमह। पढह। हसह। पढित्था॥ उत्तमस्य॥ पढामो॥ पढमु। पढम॥

For the conjugational affixes in the plural, न्ति (3rd person), ह, इत्था (2nd person), and मो, मु, म, (1st person) are substituted...

॥ अत ए से ॥ ५ ॥

नित्यार्थं वचनं यतो विशेषणम्। ततिपोः सिप्थासोः ए से इत्यादेशावत एव परौ भवतः। नान्यस्मात्॥ ततिपोः। रमए पढए॥ सिप्थासोः। रमसे पढसे॥ अत इति किम्। होइ। भवति॥

This rule limits what would otherwise be of constant application. The ए and से which are substituted by sūtras 1, 2 are only substituted when they follow अ, and not otherwise......Why do we say 'after अ'? Because we have only होइ, होसि......

॥ अस्तेर्लोपः ॥ ६ ॥

अस्तेर्धातोः थास्सिपोरादेशयोः परतो लोपो भवति ॥ सुत्तो सि। पुरिसो सि ॥ सुप्तोऽसि । पुरुषोऽसि ॥

The root अस् to be, is elided when the substitutes (vii.2) for the affixes थास् and सिप् follow......

॥ मिमोमुमानामधो हश्च ॥ ७ ॥

मिमोमुमानामस्तेः परेषामधो हकारः प्रयोक्तव्यः । अस्तेश्च लोपः॥ गओ ह्मि । गअ म्हो । गअ म्हु । गअ म्ह ॥ गतोऽस्मि । गताः स्मः ॥

ह is to be used immediately after the म् in the affixes मि, मो, मु, म, when they follow the root अस्, its elision being still enjoined by the preceding sūtra......

॥ यक ईअइज्जौ ॥ ८ ॥

यकः स्थाने ईअ इज्ज इत्यादेशौ भवतः ॥ पढीअइ पढिज्जइ। सहीअइ सहिज्जइ ॥ पठ्यते । सह्यते ॥

For यक् ( the affix of the passive ) ईअ and इज्ज are substituted ( and the personal affixes subjoined to these )......

॥ नान्त्यद्वित्वे ॥ ९ ॥

धातोरन्त्यद्वित्वे सति यक ईअ इज्ज इत्यादेशौ न भवतः ॥ हस्सइ। गम्मइ ॥ गम्यते । हस्यते ॥ गमादीनां विकल्पेन द्वित्वविधानात् द्वित्वविधान उक्तावादेशौ न भवतः। द्वित्वाविधाने तु भवत एव ॥ गमीअइ। गमिज्जइ ॥

These substitutes for यक् do not take place when the final consonant of the root is doubled.... By viii. 58 this doubling of the final is optional in the verbs गम् etc.; therefore when the final is not doubled, the sūtra 8 remains in force, and thus we have गमीअइ and गमिज्जइ....

॥ न्तमाणौ शतृशानचोः ॥ १० ॥

शतृ शानच् इत्येतयोरेकैकस्य न्त माण इत्येतावादेशौ भवतः ॥ पढंतो । पढमाणो ॥ हसंतो । हसमाणो ॥

For the perticipial affixes शतृ and शानच्, न्त and माण are mutually substituted...

॥ ई च स्त्रियाम् ॥ ११ ॥

स्त्रियां वर्तमानयोः शतृशानचोरीकारादेशो भवति । न्तमाणौ च ॥ हसई । हसंती । हसमाणा ॥ वेवई । वेवंती । वेवमाणा ॥

ई is substituted ( as well as the regular forms from न्त and माण ) for शतृ and शानच् when used in the feminine...

॥ धातोर्भविष्यति हिः ॥ १२ ॥

भविष्यति काले धातोः परो हिशब्दः प्रयोक्तव्यः ॥ होहिइ । हसिहिइ ॥ होहिंति । हसिहिंति ॥ भविष्यति । हसिष्यति । भविष्यंति । हसिष्यंति ॥

The syllable हि is to be used after the root in the Future ( and the personal affixes of the Present tense added to this)...

॥ उत्तमे स्सा हा च ॥ १३ ॥

भविष्यत्युत्तमे स्सा हा इत्येतौ प्रयोक्तव्यौ । चकारात् हिश्च ॥ होस्सामि । होहामि । होहिमि । होस्सामो । होहामो । होहिमो । इत्यादि ॥ भविष्यामि । भविष्यामः ॥

In the first person of the Future we are to use after the root स्सा and हा and also हि ( as we infer from the च in the sūtra )...

॥ मिना स्सं वा ॥ १४ ॥

भविष्यत्युत्तमे मिना सह धातोः परः स्संशब्दः प्रयोक्तव्यो वा ॥ होस्सं । पक्षे होस्सामि । होहामि । होहिमि ॥

In the first person, sing. of the Future स्सं may optionally be used after the root, superseding the personal affix मि.........In the alternative we have होस्सामि etc. ...

॥ मोमुमैर्हिस्साहित्था ॥ १५ ॥

भविष्यति काल उत्तमे बहुवचनादेशस्य मो मु म इत्येतैः सह हिस्सा हित्था इत्येतावादेशौ वा भवतः ॥ होहिस्सा होहित्था। हसिहिस्सा हसिहित्था॥ भविष्यामः। हसिष्यामः॥ पक्षे। होहिमो। होस्सामो। होहामो। हसिहिमो। हसिस्सामो। हसिहामो। एवं मुमयोरपि। इत्यादि॥

In the first person plural of the Future, हिस्सा and हित्था may be optionally added after the root, instead of any substitute for a plural affix, superseding मो, मु or म......

॥ कृदाश्रुवचिगमिरुदिदृशिविदिरूपाणां काहं दाहं सोच्छं वोच्छं गच्छं रोच्छं दच्छं वेच्छं ॥ १६ ॥

भविष्यति काल उत्तमैकवचने कृञादीनां स्थाने यथासंख्यं काहं प्रभृतय आदेशा भवन्ति ॥ काहं करिष्यामि। दाहं दास्यामि। सोच्छं श्रोष्यामि। वोच्छं वक्ष्यामि। गच्छं गमिष्यामि। रोच्छं रोदिष्यामि। दच्छं द्रक्ष्यामि। वेच्छं वेत्स्यामि इत्यादि॥

In the first person sing. of the Future, instead of the roots कृ, etc., काहं etc., are respectively substituted...

॥ श्र्वादीनां त्रिष्वप्यनुस्वारवर्जं हिलोपश्च वा ॥ १७ ॥

श्रु इत्येवमादीनां प्रथममध्यमोत्तमेषु त्रिष्वपि पुरुषेषु परतो भविष्यति काले सोच्छं इत्यादय आदेशा भवन्ति। अनुस्वारं विहाय। हिलोपश्च वा॥

सोच्छिइ सोच्छिहिइ। श्रोष्यति॥ सोच्छिंति। सोच्छिहिंति। श्रोष्यंति॥ सोच्छिसि सोच्छिहिसि। श्रोष्यसि॥ सोच्छित्था। सोच्छि-

हित्था। श्रोष्यथ ।। सोच्छिमि । सोच्छिहिमि । श्रोष्यामि ।। सोच्छिमो । सोच्छिहिमो । सोच्छिमु । सोच्छिहिमु । सोच्छिम । सोच्छिहिम । सोच्छिस्सामो । सोच्छिस्सामु । सोच्छिस्साम ।। श्रोष्यामः ।। एवं वोच्छादिरपि ।।

सोच्छं etc. ( without the अनुस्वार ) are substituted for श्रु etc., in the Future, even when the affixes of the first, second or third person follow; the elision or insertion of हि ( by sūtra 12 ) is optional......

|| उसुमु विध्यादिष्वेकस्मिन् || १८ ||

विध्यादिष्वेकस्मिन्नुत्पन्नस्य प्रत्ययस्य यथासंख्यं उ सु मु इत्येत आदेशा भवन्ति ।। हसउ । हससु । हसमु ।। हसतु । हस । हसानि ।।

उ, सु, मु are severally substituted for the proper sing. affixes in the sense of command etc. (Compare पाणिनि iii. 3. 161–162 ).

|| न्तुहमो बहुषु || १९ ||

विध्यादिषु बहुषूत्पन्नस्य प्रत्ययस्य यथासंख्यं न्तु ह मो इत्येत आदेशा भवन्ति ।। हसंतु । हसह । हसामो ।।

न्तु, ह, मो are severally substituted for the proper plural affixes in the sense of command, etc....

|| वर्तमानभविष्यदनद्यतनयोर्ज्जज्जा वा || २० ||

वर्तमाने भविष्यदनद्यतने विध्यादिषु चोत्पन्नस्य प्रत्ययस्य ज्ज ज्जा इत्येतावादेशौ वा भवतः । पक्षे यथाप्राप्तम् । वर्तमाने तावत् । होज्ज होज्जा । हसेज्ज हसेज्जा । पक्षे होइ हसइ ।। भविष्यदनद्यतने । होज्ज होज्जा । पक्षे होहिइ । इत्यादि ।। विध्यादिष्वेवम् ।।

ज्ज and ज्जा are optionally substituted for proper affixes of the Present and the Past definite ( अनद्यतन ), Future, and also when command etc. are implied ; there being an option the previous forms may by retained......

|| मध्ये च || २१ ||

वर्तमानभविष्यदनद्यतनयोर्विध्यादिषु च धातुप्रत्यययोर्मध्ये ज्जा इत्येतावादेशौ वा भवतः || वर्तमाने | होज्जइ होज्जाइ | यथाप्राप्तम् | विध्यादिषु | होज्जउ होज्जाउ | भवेदित्यादि ||

ज्ज and ज्जा are also optionally inserted between the root and the affixes, in the Present, Future and the Imperative.

|| नानेकाचः || २२ ||

वर्तमानभविष्यदनद्यतनयोर्विध्यादिषु चानेकाचो धातोः प्रत्यये परे मध्ये ज्ज ज्जा इत्येतावादेशौ न भवतः किं त्वन्त एव भवतः | हसइ तुवरइ || अन्ते यथा || हसेज्ज हसेज्जा तुवरेज्ज तुवरेज्जा | एवमन्येऽप्युदाहर्तव्याः ||

ज्ज and ज्जा, however, are not thus inserted between the root and the affix, except when the root ends in a vowel ( and is, therefore, monosyllabic, एकाच्, since a root which ends in a consonant, becomes dissyllabic by the addition of the अनुबन्ध vowel )......But this does not preclude their being employed at the end......

|| ईअ भूते || २३ ||

भूते काले धातोः प्रत्ययस्य ईअ इत्ययमादेशो भवति || हुवीअ हसीअ || अभवत् | अहसत् ||

ईअ is substituted for the affix after a root in the Past tense......

|| एकाचो हीअ || २४ ||

भूते काले एकाचो धातोः प्रत्ययस्य हीअ इत्ययमादेशो भवति || होहीअ || अभूत् ||

हीअ is substituted for the affix after a monosyllabic root in the Past tense......

॥ अस्तेरासिः ॥ २५ ॥

अस्तेर्भूते काल एकस्मिन्नर्थे आसि इति निपात्यते ॥ आसि राआ । आसि वहू ॥ आसीद्राजा । आसीद्वधूः ॥

आस is substituted for अस्ति in the sing. of the Past tense......

॥ णिच एदादेरत आत् ॥ २६ ॥

णिच्प्रत्ययस्य एकारादेशो भवति । धातोरादेरकारस्य च आत्वं भवति ॥ कारेइ । हासेइ । पाढेइ ॥ कारयति । हासयति । पाठयति ॥

ए is substituted for णिच्, the causal affix and the अ in the first syllable of the root becomes आ......

॥ आवे च ॥ २७ ॥

णिच आवे इत्ययमादेशो भवति । चकारात् पूर्वोक्तं च ॥ करावेइ । हसावेइ । पढावेइ । कारावेइ इत्यादि ॥

आवे also is substituted for णिच्, as well as ए......

॥ आविः क्तकर्मभावेषु वा ॥ २८ ॥

णिच आविरादेशो भवति वा क्तप्रत्यये परतो भावकर्मणोश्च ॥ कराविअं हसाविअं पढाविअं । कारिअं हासिअं पाढिअं ॥ भावकर्मणोश्च कराविज्जइ । हसाविज्जइ । पढाविज्जइ । कारिज्जइ । हासिज्जइ । पाढिज्जइ ॥ कारितं । हासितं । पाठितं । कार्यते । हास्यते । पाठ्यते ॥

आवि is optionally substituted for णिच् when क्त ( the affix of the past passive participle, ) follows and also in the passive voice ( भावकर्मणोः )......

॥ नैदावे ॥ २९ ॥

क्तभावकर्मसु णिच्प्रत्ययस्य एत् आवे इत्येतावादेशौ न भवतः॥ कारिअं । कराविअं । कारिज्जइ । कराविज्जइ ॥

ए and आवे are not substituted for णिच्, when क्त follows or in the passive voice......

॥ अत आ मिपि वा ॥ ३० ॥

अकारान्ताद्धातोर् मिपि परत आकारादेशो भवति वा ॥ हसामि, हसमि ॥

आ is optionally substituted for the final of a root ending in अ, when मिप् follows......

॥ इच्च बहुषु ॥ ३१ ॥

मिपो बहुषु परतोऽत इकारादेशो भवति । चकारादाकारश्च ॥ हसिमो । हसामो । हसिमु । हसामु ॥

इ is substituted ( as well as आ ) for the final अ in the first person plural......

॥ क्ते ॥ ३२ ॥

क्तप्रत्यये परतोऽत इर्भवति ॥ हसिअं । पढिअं ॥

इ is substituted for the final अ, when क्त, the affix of the past passive participle, follows .....

॥ ए च क्त्वातुमुन्तव्यभविष्यत्सु ॥ ३३ ॥

क्त्वा तुमुन् तव्य इत्येतेषु भविष्यति काले च अत एत्वं भवति । चकारादित्त्वं ॥ हसेऊण हसिऊण । हसेउं हसिउं । हसेअव्वं हसिअव्वं । हसेहिइ हसिहिइ ॥

When the affixes क्त्वा, तुमुन् and तव्य follow, and also in the Future tense, ए is substituted for the final अ of the root ; and also इ, as we infer from the word च in the sūtra......

॥ लादेशे वा ॥ ३४ ॥

लकारादेशे परतोऽत एत्वं भवति वा ॥ हसेइ हसइ । पढेइ पढइ । हसेंति हसंति । हसेउ हसउ ॥

ए is substituted for the final अ of the root wherever it is followed by ल *i. e.*, any conjugational affix...

॥ इति वररुचिकृते प्राकृतप्रकाशे तिङ्विधिर्नाम सप्तमः परिच्छेदः ॥

## ॥ अथाष्टमः परिच्छेदः ॥

॥ भुवो होहुवौ ॥ १ ॥

भू सत्तायाम् । एतस्य धातोर्हो हुव इत्येतावादेशौ भवतः ॥ होइ हुवइ । होंति हुवंति ॥

For the verbal root भू to be, हो and हुव are substituted...

॥ क्ते हुः ॥ २ ॥

भुवः क्तप्रत्यये परतो हु इत्यादेशो भवति । हुअं ॥

When भू is followed by क्त, हु is substituted......

॥ प्रादेर्भवः ॥ ३ ॥

प्रादेरुत्तरस्य भुवो भव इत्ययमादेशो भवति ॥ पभवइ । उब्भवइ । संभवइ । परिभवइ ॥

When भू follows a preposition such as प्र, भव is substituted......

॥ त्वरस्तुवरः ॥ ४ ॥

ञित्वरा संभ्रमे । अस्य धातोस्तुवर इत्ययमादेशो भवति॥ तुवरइ॥

For the root त्वर् to hasten, तुवर is substituted......

॥ क्ते तुरः ॥ ५ ॥

क्तप्रत्यये तुर इत्ययमादेशो भवति ॥ तुरिअं ॥

When the root त्वर is followed by क्त, तुर is substituted.

॥ घुणो घोलः ॥ ६ ॥

घुण घूर्ण भ्रमणे । अस्य धातोर्घोल इत्ययमादेशो भवति घोलइ ॥

For the root घुण (which in the धातुपाठ is arranged with घूर्ण in the sense of 'rolling'. घोल is substituted......

॥ णुदो णोल्लः ॥ ७ ॥

णुद प्रेरणे । अस्य धातोर्णोल्ल इत्ययमादेशो भवति ॥ णोल्लइ । पणोल्लइ ॥

For the root णुद to send, णोल्ल is substituted......

॥ दूङो दूमः ॥ ८ ॥

दूङ् परितापे । अस्य धातोर्दूमादेशो भवति ॥ दूमइ ॥

For the root दू to be pained, दूम is substituted......

॥ पटेः फलः ॥ ९ ॥

अट पट गतौ । अस्य धातोः फल इत्ययमादेशो भवति । फलिअं हिअअं ॥

For the root पट ( associated in the धातुपाठ with अट in the sense of moving ), फल is substituted......

॥ पदेः पालः ॥ १० ॥

पद गतौ । अस्य धातोः पाल इत्ययमादेशो भवति ॥ पालेइ ॥

For the root पद् to go, पाल is substituted......

॥ वृषकृषमृषहृषामृतो ऽरिः ॥ १० ॥

वृषादीनामृतः स्थाने अरि इत्यादेशो भवति ॥ वरिसइ । करिसइ । मरिसइ । हरिसइ ॥

अरि is substituted for the ऋ in the roots वृष् etc......

॥ ऋतो ऽरः ॥ १२ ॥

ऋकारान्तस्य धातोर्ऋतः स्थाने अर इत्यादेशो भवति ॥ मृ । मरइ ॥ सृ । सरइ ॥ वृ । वरइ ॥

अर is substituted when the root ends in ऋ......

॥ कृञः कुणो वा ॥ १३ ॥

डुकृञ् करणे । अस्य धातोः प्रयोगे कुणो वा भवति ॥ कुणइ । करइ ॥

For the root कृ to do, कुणो is optionally substituted......

॥ जृभो जंभाअः ॥ १४ ॥

जभ जृभी गात्रविनामे । अस्य धातोर्जंभाअ इत्ययमादेशो भवति ॥ जंभाअइ ॥

For the root जृभ् to yawn, जंभाअ is substituted......

॥ ग्रहेर्गेण्हः ॥ १५ ॥

ग्रह उपादाने । अस्य धातोर्गेण्हो भवति ॥ गेण्हइ ॥

For the root ग्रह् to take, गेण्ह is substituted......

॥ घेत् क्त्वातुमुन्तव्येषु ॥ १६ ॥

ग्रहेर्घेत् इत्ययमादेशो भवति क्त्वातुमुन्तव्येषु परतः ॥ घेत्तूण । घेत्तुं । घेत्तव्वं ॥

घेत् is substituted for ग्रह्, when followed by क्त्वा, तुमुन् and तव्य...

॥ कृञः का भूतभविष्यतोश्च ॥ १७ ॥

भूतभविष्यतोः कालयोः कृञः का इत्ययमादेशो भवति । चकारात् क्त्वातुमुन्तव्येषु परतः ॥ काहीअ । काहिइ । काऊण । काउं । काअव्वं ॥

का is substituted for the root कृ to do, in the Past and Future tenses, and also (as we infer from the च in the sūtra) when the affixes क्त्वा, तुमुन् and तव्य follow......

॥ स्मरतेर्भरसुमरौ ॥ १८ ॥

स्मृ चिन्तायाम् । अस्य धातोर्भरसुमरौ भवतः ॥ भरइ । सुमरइ ।

भर and सुमर are substituted for the root स्मृ to recollect...

॥ भियो भावीहौ ॥ १९ ॥

त्रिभी भये । अस्य धातोर्भाबीहौ भवतः ॥ भाइ । बीहइ ॥

For the root भी to fear, भा and बीह are substituted......

॥ जिघ्रतेः पापाओ ॥ २० ॥

घ्रा गन्धग्रहणे । अस्य धातोः पा पाअ इत्यादेशौ भवतः ॥ पाइ पाअइ ॥

For the root घ्रा to smell, पा and पाअ are substituted......

॥ म्लै वावाओ ॥ २१ ॥

म्लै गात्रविनामे । अस्य धातोर्वावाओ भवतः ॥ वाइ । वाअइ ॥

For the root म्लै to wither, वा and वाअ are substituted...

॥ तृपस्थिपः ॥ २२ ॥

तृप्त तृंप तृप्तौ । अस्य धातोस्थिपो भवति ॥ थिंपइ ॥

For the root तृप् to be pleased, (associated with तृम्प् in the धातुपाठ) थिंप is substituted......

॥ ज्ञो जाणमुणौ ॥ २३ ॥

ज्ञा अवबोधने । अस्य धातोर्जाणमुणौ भवतः ॥ जाणइ । मुणइ ॥

For the root ज्ञा to know, जाण and मुण are substituted...

॥ जल्पेर्लो मः ॥ २४ ॥

जल्प व्यक्तायां वाचि । अस्य धातोर्लकारस्य मकारो भवति ॥ जंपइ ॥

In the root जल्प् to speak articulately, the ल् is substituted by म्......

॥ ष्ठाध्यागानां ठाअझाअगाआः ॥ २५ ॥

ष्ठा गतिनिवृत्तौ । ध्यै चिन्तायाम् । कै गै रै शब्दे । एतेषां ठाअ झाअ गाअ इत्येत आदेशा भवन्ति । ठाअंति । झाअंति । गाअंति ॥

For the roots ष्ठा to stand, ध्यै to meditate and गै to sing (given in the धातुपाठ along with कै and रै) ठाअ, झाअ and गाअ are respectively substituted ......

|| ठाझागाश्च वर्तमानभविष्यद्विध्याद्येकवचनेषु || २६ ||

ष्ठाध्यागानां ठा झा गा इत्यादेशा भवन्ति चकारात् पूर्वोक्ताश्च वर्तमानभविष्यद्विध्याद्येकवचनेषु परतः || ठाइ ठाअइ | ठाहिइ ठाअहिइ | ठाउ ठाअउ || झाइ झाअइ | झाहिइ झाअहिइ | झाउ झाअउ || गाइ गाअइ | गाहिइ गाअहिइ | गाउ गाअउ ||

For the roots ष्ठा, ध्यै and गै, when followed by the sing. affixes of the Imperative, the Future and the Present ठा, झा and गा are severally substituted as well as the substitutes mentioned in the preceding sūtra......

|| खादिधाव्योः खाधौ || २७ ||

खादृ भक्षणे | धावु जवे | एतयोर्धात्वोः खा धा इत्यादेशौ भवतः | वर्तमानभविष्यद्विध्याद्येकवचनेषु || खाइ | खाहिइ | खाउ || धाइ | धाहिइ | धाउ ||

For the roots खादृ to eat, and धावु to run, खा and धा are respectively substituted......

|| ग्रसेर्विसः || २८ ||

ग्रसु ग्लसु अदने | अस्य धातोर्विसो भवति || विसइ ||

For the root ग्रस् to eat, (given in the धातुपाठ along with ग्लस्) विस् is substituted......

|| चिञश्चिणः || २९ ||

चिञ् चयने | अस्य धातोश्चिणो भवति || चिणइ ||

For the root चि to collect, चिण is substituted...

॥ क्रीञः किणः ॥ ३० ॥

डुक्रीञ् द्रव्यविनिमये। अस्य धातोः किणो भवति ॥ किणइ ॥

For the root क्री to barter, किण is substituted......

॥ वेः के च ॥ ३१ ॥

वेरुत्तरस्य क्रीञः के आदेशः किणादेशश्च भवति ॥ विक्केइ। विक्किणइ ॥

For the root क्री after the preposition वि, के is substituted as also किण as we enfer from च in the sūtra...

॥ उद्ध्म उद्धुमा ॥ ३२ ॥

ध्मा शब्दाग्निसंयोगयोः। अस्य धातोरुत्पूर्वस्य उद्धुमा भवति। उद्धुमाइ ॥

For the root ध्मा to blow, when preceded by the preposition उद्, उद्धुमा is substituted......

॥ श्रदो धो दहः ॥ ३३ ॥

श्रच्छब्दादुत्तरस्य डुधाञ् धारणपोषणयोः अस्य धातोर्दहादेशो भवति ॥ सद्दहइ। सद्दहिअं ॥

For the root धा to hold, when preceded by the particle श्रद्, दह is substituted......

॥ अवाद्गाहेर्वाहः ॥ ३४ ॥

गाहू विलोडने। अस्य धातोरवादुत्तरस्य वाहादेशो भवति ॥ ओवाहइ। अववाहइ ॥

For the root गाह् to dip, when preceded by the preposition अव, वाह is substituted......

॥ कासेर्वासः ॥ ३५ ॥

अवादित्यनुवर्तते । कासृ शब्दकुत्सायां । अस्य धातोरवादुत्तरस्य वासो भवति ॥ ओवासइ । अववासइ ॥

Preceded by अव continues to be implied from the preceding sūtra. For the root कास् to cough, when preceded by अव, वास is substituted......

॥ निरो माङो माणः ॥ ३६ ॥

माङ् माने । अस्य धातोर्निरुत्तरस्य माणादेशो भवति । णिम्माणइ ।

For the root मा to measure, when preceded by the preposition निर्, माण is substituted......

॥ क्षियो झिज्जः ॥ ३७ ॥

क्षि क्षये । अस्य धातोर्झिज्जो भवति ॥ झिज्जइ ॥

झिज्ज is substituted for the root क्षि to destroy...

॥ भिदिछिदोरन्त्यस्य न्दः ॥ ३८ ॥

भिदिर् छिदिर् । एतयोरन्त्यस्य न्दो भवति ॥ भिंदइ । छिंदइ ॥

For the final of the roots भिद् and छिद्, न्द is substituted.

॥ क्वथढः ॥ ३९ ॥

क्वथ निष्पाके । अस्य धातोरन्त्यस्य ढो भवति ॥ कढइ ॥

For the final of the root क्वथ् to boil, ढ is substituted....

॥ वेष्टेश्च ॥ ४० ॥

वेष्ट वेष्टने । अस्य धातोरन्त्यस्य ढो भवति ॥ वेढढइ ॥ योगविभाग उत्तरार्थः ॥

ढ is also substituted for the final of the root वेष्ट् to cover......This and the preceding sūtra, which might

well have been united, are separated on account of the latter of the two being required for the next sūtra (where the word वेष्टेः is implied) .....

॥ उत्समोर्लः ॥ ४१ ॥

उत्संभ्यामुत्तरस्य वेष्टेरन्त्यस्य ल्लो भवति ॥ उव्वेल्लइ । संवेल्लइ ॥

For the final of the root वेष्ट्, ल्ल is substituted, when it is preceded by the prepositions उत् and सम्......

॥ रुदेर्वः ॥ ४२ ॥

रुदिर् । अस्य धातोरन्त्यस्य वो भवति ॥ रुवइ ॥

व is substituted for the final of the root रुद् to weep.

॥ उदो विजेः ॥ ४३ ॥

उत्पूर्वस्य विजेरन्त्यस्य वकारो भवति ॥ उव्विवइ ॥

व is substituted for the final of विज् preceded by उद्......

॥ वृधेर्ढः ॥ ४४ ॥

वृधु वर्धने । अस्य धातोरन्त्यस्य ढो भवति ॥ वड्ढइ ॥

ढ is substituted for the final of वृध् to prosper......

॥ हन्तेर्म्मः ॥ ४५ ॥

हन्तेरन्त्यस्य म्मो भवति ॥ हम्मइ ॥

म्म is substituted for the final of the root हन् to kill......

॥ रुषादीनां दीर्घता ॥ ४६ ॥

रुषादीनां दीर्घता भवति ॥ रूसइ । तूसइ । सूसइ । रुष्यति । तुष्यति । शुष्यति ॥

In the roots रुष् etc. the vowel is lengthened......

॥ चो व्रजनृत्योः ४७ ॥

व्रज नृती । अनयोरन्त्यस्य च्चो भवति ॥ वच्चइ । णच्चइ ॥

च्च is substituted for the final of व्रज् and नृत्......

॥ युधिबुध्योर्ज्झः ॥ ४८ ॥

युध संप्रहारे । बुध अवगमने । अनयोरन्त्यस्य ज्झो भवति ॥ जुज्झइ । बुज्झइ ॥

ज्झ is substituted for the final of युध् and बुध्......

॥ रुधेर्न्धम्भौ ॥ ४९ ॥

रुधिर् । अन्त्यस्य न्धम्भौ भवतः ॥ रुन्धइ । रुम्भइ ॥

न्ध and म्भ are substituted for the final of the root रुध्...

॥ मृदो लः ॥ ५० ॥

मृद क्षालने । अस्य धातोरन्त्यस्य लो भवति ॥ मलइ ॥

ल is substituted for the final of the root मृद् to grind...

॥ शद्लृपत्योर्डः ॥ ५१ ॥

शद्लृ शातने पत्लृ पतने । अनयोरन्त्यस्य डो भवति ॥ सडइ। पडइ ॥

ड is substituted for the final of शद् and पत्......

॥ शकादीनां द्वित्वम् ॥ ५२ ॥

शक्लृ शक्तौ । इत्येवमादीनां द्वित्वं भवति ॥ सक्कइ । लग्गइ ॥ शक्नोति । लगति ॥

The final of the root शक् to be able, etc. is doubled...

॥ स्फुटिचल्योर्वा ॥ ५३ ॥

स्फुट विकसने । चल कम्पने । अनयोरन्त्यस्य वा द्वित्वं भवति ॥ फुट्टइ फुडइ । चल्लइ चलइ ॥

The final of the roots स्फुट् to bloom, and चल् to shake, is optionally doubled...

॥ प्रादेर्मीलः ॥ ५४ ॥

प्रादेरुत्तरस्य मीलोऽन्त्यस्य द्वित्वं भवति वा॥ पमिल्लइ । पमीलइ॥
The final of the root मील् to wink, is optionally doubled, when it is preceded by the prepositions प्र etc......

॥ भुजादीनां क्त्वातुमुन्तव्येषु लोपः ॥ ५५ ॥

भुज इत्येवमादीनां क्त्वातुमुन्तव्येषु परतोऽन्त्यस्य लोपो भवति ॥ भोत्तूण। भोत्तुं। भोत्तव्वं ॥ विदः। वेत्तूण । वेत्तुं । वेत्तव्वं ॥ रुदः। रोत्तूण । रोत्तुं । रोत्तव्वं ॥
The finals of the roots भुज् etc. are elided, when the affixes क्त्वा, तुमुन् and तव्य follow......

॥ श्रुहुजिलूधुवां णोऽन्त्ये ह्रस्वः ॥ ५६ ॥

श्रु श्रवणे । हु दानादाने । जि जये ॥ लूञ् छेदने । धूञ् कम्पने । इत्येतेषामन्त्ये णः प्रयोक्तव्यः । दीर्घस्य ह्रस्वो भवति ॥ सुणइ । हुणइ। जिणइ । लुणइ । धुणइ ॥
At the end of roots श्रु, हु, जि, लू and धू, ण is to be employed and the preceding long vowel is to be shortened ......

॥ भावकर्मणोर्व्वश्च ॥ ५७ ॥

एषां भावकर्मणोरन्त्ये व्वशब्दः प्रयोक्तव्यः ॥ चकाराद् णश्च ॥ सुव्वइ सुणिज्जइ । हुव्वइ हुणिज्जइ ॥ जिव्वइ जिणिज्जइ । लुव्वइ लुणिज्जइ । धुव्वइ धुणिज्जइ ॥
At the end of these roots, when the passive is signified, व्व is to be employed; ण may also be used as we infer from the च in the sūtra ......

॥ गमादीनां द्वित्वं वा ॥ ५८ ॥

गमादीनां धातूनां द्वित्वं वा भवति भावकर्मणोः ॥ गम्मइ गमिज्जइ। रम्मइ रमिज्जइ । हस्सइ हसिज्जइ ॥ गम्यते । रम्यते। हस्यते ॥

In the case of the roots गम् etc. the final letter is optionally doubled in the passive......

|| लिहेर्लिज्झः || ५९ ||

लिह आस्वादने । अस्य धातोर्लिज्झो भवति भावकर्मणोः ॥ लिज्झइ ॥

लिज्झ is substituted for लिह् to lick in the passive ......

|| हृक्रोर्हीरकीरौ || ६० ||

हृञ् हरणे । डुकृञ् करणे । अनयोर्हीरकीरौ भवतो भावकर्मणोरर्थयोः ॥ हीरइ । कीरइ ॥

हीर and कीर are respectively substituted for हृ and कृ in the passive......

|| ग्रहेर्दीर्घो वा || ६१ ||

ग्रहेर्धातोर्दीर्घो वा भवति भावकर्मणोरर्थयोः ॥ गाहिज्जइ । गहिज्जइ ॥

A long vowel is optionally substituted for the short अ in ग्रह् in the passive......

|| क्तेन दिण्णादयः || ६२ ||

दिण्ण इत्येवमादयः क्तप्रत्ययेन सह निपात्यन्ते ॥ डुदाञ् दाने । दिण्णं ॥ रुदिर् । रुण्णं ॥ त्रसी । हित्थं ॥ दह् । दड्ढं ॥ रंजि । रत्तं ॥

दिण्ण etc. are used as irregular forms for some past passive participles with the affix क्त, *e.g.*, दिण्ण, रुण्ण, हित्थ, दड्ढ, रत्त from दा, रुद, त्रस्, दह् and रञ्ज्......

|| खिदेर्विसूरः || ६३ ||

खिद दैन्ये । अस्य विसूरो भवति ॥ विसूरइ । विरहेण विसूरइ बाला ॥

विसूर is substituted for खिद् to be distressed......

॥ क्रुधेर्जूरः ॥ ६४ ॥

क्रुध कोपे । अस्य जूरो भवति ॥ जूरइ ॥

जूर is substituted for क्रुध् to be angry......

॥ चर्चेश्चंपः ॥ ६५ ॥

चर्च अध्ययने । अस्य धातोश्चंपो भवति ॥ चंपइ ॥

चंप is substituted for चर्च् to study......

॥ त्रसेर्वज्जः ॥ ६६ ॥

त्रसी उद्वेगे । अस्य धातोर्वज्जो भवति ॥ वज्जइ ॥

वज्ज is substituted for त्रस् to fear......

॥ मृजेर्लुभसुपौ ॥ ६७ ॥

मृजू शुद्धौ । अस्य धातोर् लुभ सुप इत्यादेशौ भवतः ॥ लुभइ । सुपइ ॥

लुभ and सुप are substituted for मृज् to wash...

॥ वुट्टखुप्पौ मस्जेः ॥ ६८ ॥

टुमस्जी शुद्धौ । अस्य धातोर् वुट्टखुप्पौ भवतः ॥ वुट्टइ । खुप्पइ ॥

वुट्ट and खुप्प are substituted for मस्ज् to purify......

॥ दृशेः पुलअणिअक्कअवक्खाः ॥ ६९ ॥

दृशिर् प्रेक्षणे । अस्य पुलअणिअक्कअवक्खा भवन्ति ॥ पुलअइ । णिअक्कइ । अवक्खइ ॥

पुलअ, णिअक्क and अवक्ख are substituted for दृश् to see...

॥ शकेस्तरवअतीराः ॥ ७० ॥

शक्लृ शक्तौ । अस्य धातोः तर वअ तीर इत्येत आदेशा भवन्ति ॥ तरइ । वअइ । तीरइ ॥

तर, वअ and तीर are substituted for शक् to be able......

॥ शेषाणामदन्तता ॥ ७१ ॥

शेषाणां लुप्तानुबन्धानामदन्तता भवति ॥ भमइ । चुंबइ ॥

The अनुबन्ध's (*i. e.* the ending portions such as ल् in शकल्, इर् in दुशिर् etc.) of the remaining roots are elided, and the roots themselves considered as ending in अ......

॥ इति वररुचिकृते प्राकृतप्रकाशे धात्वादेशपरिच्छेदोऽष्टमः ॥

## ॥ अथ नवमः परिच्छेदः ॥

॥ निपाताः ॥ १ ॥

अधिकारोऽयम् । वक्ष्यमाणा निपातसंज्ञका वेदितव्याः । संस्कृतानुसारेण निपातकार्यं वक्तव्यम् ॥

This is an अधिकारसूत्र. This section will treat of particles, following the method of Sanskrit grammarians......

॥ हुं दानपृच्छानिर्धारणेषु ॥ २ ॥

हुं इत्ययं शब्दो दानपृच्छानिर्धारणेष्वर्थेषु निपातसंज्ञो भवति ॥ दाने यथा । हुं गेण्ह अप्पणो जीअं ॥ पृच्छायां । हुं साहसु सब्भावं ॥ निर्धारणे । हुं हुवसु तुण्हिक्को ॥ हुं गृहाणात्मनो जीवम् । हुं कथय सद्भावम् । हुं भव तूष्णीकः ॥

हुं is a particle used in the sense of giving, asking or speaking emphatically......

॥ विअ वेअ अवधारणे ॥ ३ ॥

विअ वेअ इत्येतावधारणे निपातसंज्ञौ भवतः ॥ एवं विअ । एवं वेअ ॥ एवमेव ॥

विअ and वेअ are particles used in the sense of asservation......

॥ ओ सूचनापश्चात्तापविकल्पेषु ॥ ४ ॥

ओ इत्ययं शब्दः सूचनापश्चात्तापविकल्पेषु निपातसंज्ञो भवति॥ ओ चिराअसि ॥ गाथासु द्रष्टव्यः ॥

ओ is used in the sense of indication, remorse and indecision......Its use should be noticed from Prakrit poetry......

॥ इरकिरकिला अनिश्चिताख्याने ॥ ५ ॥

इर किर किल इत्येते शब्दा अनिश्चिताख्याने निपातसंज्ञका भवन्ति ॥ पेक्ख इर तेण हदो । अज्ज किर तेण ववसिओ । अअं किल सिविणओ ॥ प्रेक्षस्व किल तेन हतः । अद्य किल तेन व्यवसितः । अयं किल स्वप्नः ॥

इर, किर and किल are used in doubtful assertion......

॥ हुं क्खु निश्चयवितर्कसंभावनेषु ॥ ६ ॥

हुं क्खु इत्येतौ निश्चयवितर्कसंभावनेषु निपातसंज्ञकौ भवतः॥ हुं रक्खसो । गरुओ क्खु भारो ॥ हुं राक्षसः । गुरुः खलु भारः ॥

हुं and क्खु are used in the sense of resolution, doubt, or reflection......

॥ णवरः केवले ॥ ७ ॥

णवर इत्ययं शब्दः केवलेऽर्थे निपातसंज्ञो भवति ॥ णवर अण्णं ॥

णवर is used in the sense of 'only'......

॥ आनन्तर्ये णवरि ॥ ८ ॥

णवरीत्ययं शब्द आनन्तर्ये निपातसंज्ञो भवति ॥ णवरि ॥

णवरि, then, is used in the sense of immediate sequence.

॥ किणो प्रश्ने ॥ ९ ॥

किणो इत्ययं शब्दः प्रश्ने निपातसंज्ञो भवति ॥ किणो धुव्वासि । किणो हससि ॥ किं नु धूयसे । किं नु हससि ॥

किणो is used in the sense of a question......

॥ अव्वो दुःखसूचनासंभावनेषु ॥ १० ॥

अव्वो इत्ययं शब्दो दुःखसूचनासंभावनेषु निपातसंज्ञो भवति॥ दुःखे। अव्वो कज्जलरसरंजिएहिं अच्छीहिं ॥ सूचनायाम्। अव्वो अवरं विअ॥ संभावने। अव्वो णं मिव अत्तुं॥ अहो कज्जलरस-रंजिताभ्यामक्षिभ्याम्। अहो अपरमिव। अहो एनमिवात्तुम्॥

अव्वो is used in the sense of distress, indication or reflection......

॥ अलाहि निवारणे ॥ ११ ॥

अलाहि इत्ययं शब्दो निवारणे निपातसंज्ञो भवति॥ अलाहि कलहलेसेण। अलाहि कलहबंधेण॥ अलं कलहलेशेन। अलं कलह-बन्धेन॥

अलाहि is used in the sense of prohibition......

॥ अइ वले संभाषणे ॥ १२ ॥

अइ वले इत्येतौ शब्दौ संभाषणे निपातसंज्ञौ भवतः॥ अइ मूलं पसूसइ। वले किं कलेसि अवले। अपि मूलं प्रशुष्यति। वले किं कलयसि अवले॥

अइ and वले are used in addressing a person...

॥ णवि वैपरीत्ये ॥ १३ ॥

णवि इत्ययं शब्दो वैपरीत्ये निपातसंज्ञो भवति॥ णवि तह पहसइ वाला। विपरीतं तथा प्रहसति वाला॥

णवि is used in the sense of contrariety...

॥ सू कुत्सायां ॥ १४ ॥

सू इत्ययं शब्दः कुत्सायां निपातसंज्ञो भवति॥ सू सिविणो॥ धिक् स्वप्नः॥

सू is used in the sense of censure......

॥ रे अरे हिरे संभाषणरतिकलहाक्षेपेषु ॥ १५ ॥

रे। अरे। हिरे। इत्येते शब्दाः संभाषणरतिकलहाक्षेपेषु निपातसंज्ञा भवन्ति यथासंख्यम् ॥ रे मा करेहि। णाओ सि अरे। दिट्ठो सि हिरे ॥ रे मा कुरुष्व ॥ नागोऽसि अरे। दृष्टोऽसि हिरे ॥

रे, अरे and हिरे are used in the sense of addressing a person, or amorous sport or quarrelling......

॥ म्मिवमिवविआ इवार्थे ॥ १६ ॥

म्मिव मिव विअ इत्येते शब्दा इवार्थे निपातसंज्ञका भवन्ति ॥ गअणं म्मिव। गअणं मिव। गअणं विअ कसणं। गगनमिव कृष्णम् ॥

म्मिव, मिव and विव are used in the sense of इव...

॥ अज्ज आमन्त्रणे ॥ १७ ॥

अज्ज इत्ययं शब्द आमन्त्रणे निपात्यते। अज्ज महाणुहाव किं करेसि ॥ अहो महानुभाव किं करोषि ॥

अज्ज is used in the sense of courteous address...

॥ शेषः संस्कृतात् ॥ १८ ॥

उक्तादन्यः शेषः। प्रत्ययसमासतद्धितलिङ्गवर्णकादिविधिः शेषः संस्कृतादवगन्तव्यः। इह ग्रन्थविस्तरभयान्न दर्शितः ॥

The remainder (*i. e.*, all that has not been treated of) whether rules for affixes, compounds, तद्धित derivatives, genders, letters etc., must be learned from Sanskrit grammar. They are omitted here for fear of swelling the treatise...

॥ इति वररुचिकृते प्राकृतप्रकाशे निपातसंज्ञाविधिर्नाम नवमः परिच्छेदः ॥

## ॥ अथ दशमः परिच्छेदः ॥

॥ पैशाची ॥ १ ॥

पिशाचानां भाषा पैशाची । सा च लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥

The पैशाची is the dialect of the पिशाचs, goblins or barbarians, which is explained in this section by definitions and examples.

॥ प्रकृतिः शौरसेनी ॥ २ ॥

अस्याः पैशाच्याः प्रकृतिः शौरसेनी । स्थितायां शौरसेन्यां पैशाचीलक्षणं प्रवर्तयितव्यम् ॥

The base of this dialect is शौरसेनी (to be explained in the last section of this treatise). The rules of पैशाची should be applied to forms after they are obtained from शौरसेनी......

॥ वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ ॥ ३ ॥

वर्गाणां तृतीयचतुर्थयोर्वर्णयोरयुक्तयोरनादौ वर्तमानयोः स्थाने आद्यौ प्रथमद्वितीयौ भवतः ॥ गकनं । मेखो । राचा । निच्छरो । बटिसं । दसवतनो । माधवो । गोपिंतो । केसपो । सरफसं । सलफो ॥

अयुजोरिति किम् । संगामो । वग्घो । इत्यादि ॥ अनादाविति किम् । गमनं । इत्यादि ॥ गगन । मेघ । राजा । निर्झर । बडिश । दशवदन । माधव । गोविंद । केशव । सरभस । शलभ । संग्राम । व्याघ्र । गमन ॥

Instead of the third and fourth letters of each class, when single and non-initial, we must use the first and second respectively. Why single ? Because we have संगामो and वग्घो in पैशाची. Why non-initial ? Because we have गमन etc....

॥ इवस्य पिवः ॥ ४ ॥

इवशब्दस्य स्थाने पिव इत्ययमादेशो भवति ॥ कमलं पिव मुखं ॥
पिव is used for इव......

॥ णो नः ॥ ५ ॥

णकारस्य स्थाने नकार इत्ययमादेशो भवति ॥ तलुनी । तरुणी ॥
न is used for ण...

॥ ष्टस्य सटः ॥ ६ ॥

ष्ट इत्यस्य स्थाने सट इत्ययमादेशो भवति ॥ कसटं मम वट्टइ ॥
कष्टं मम वर्तते ॥
सट is substituted for the conjunct ष्ट...

॥ स्नस्य सनः ॥ ७ ॥

स्न इत्यस्य स्थाने सन इत्ययमादेशो भवति ॥ सनानं । सनेहो ॥
सन is substituted for स्न...

॥ र्यस्य रिअः ॥ ८ ॥

र्य इत्यस्य स्थाने रिअ इत्ययमादेशो भवति ॥ भारिआ ॥ भार्या ॥
रिअ is substituted for र्य......

॥ ज्ञस्य ञ्ञः ॥ ९ ॥

ज्ञ इत्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति ॥ विञ्ञातो । सव्वञ्ञो ॥
विज्ञात । सर्वज्ञ ॥
ञ्ञ is substituted for ज्ञ......

॥ कन्यायां न्यस्य ॥ १० ॥

कन्याशब्दे न्यस्य स्थाने ञ्ञ इत्ययमादेशो भवति ॥ कञ्ञा ॥
ञ्ञ is substituted for न्य in कन्या......

॥ ज्ज च्च ॥ ११ ॥

ज्जशब्दस्य शौरसेनीसाधितस्य च्च इत्ययमादेशो भवति ॥ कच्चं ॥ कार्यं ॥

च्च is substituted for ज्ज, which in शौरसेनी is substituted for र्य......

॥ राज्ञो राचि टाङसिङस्ङिषु वा ॥ १२ ॥

राजन्शब्दस्य टा ङसि ङस् ङि इत्येतेषु परतो राचि इत्ययमादेशो वा भवति ॥ राचिना रञ्ञा । राचिनो रञ्ञो । राचिनि रञ्ञि ॥ एतेष्विति किम् ॥ राचा । राचानं । रञ्ञो ॥

राचि is optionally used for राजन् before the case-affixes टा, ङसि ङस् and ङि......Why only before these affixes? Because we have राचा etc......

॥ क्त्वस्तूनं ॥ १३ ॥

क्त्वाप्रत्ययस्य स्थाने तूनं इत्ययमादेशो भवति ॥ दातूनं । कातूनं । घेत्तूनं ॥

तूनं is substituted for क्त्वा ......

॥ हृदयस्य हितअकं ॥ १४ ॥

हृदयशब्दस्य हितअकं निपात्यते ॥ हितअकं हरसि मे तलुनि ॥

हितअक is substituted for हृदय ......

॥ इति वररुचिकृते प्राकृतप्रकाशे पैशाचिको नाम दशमः परिच्छेदः ॥

## ॥ अथ एकादशः परिच्छेदः ॥

॥ मागधी ॥ १ ॥

मागधानां भाषा मागधी । लक्ष्यलक्षणाभ्यां स्फुटीक्रियते ॥

The मागधी is the dialect of the मागधs, (*i. e.*, people of the मगध country), and it is here explained by definitions and examples.

॥ प्रकृतिः शौरसेनी ॥ २ ॥

अस्या मागध्याः प्रकृतिः शौरसेनीति वेदितव्यम् ॥
शौरसेनी is the base of this मागधी dialect.

॥ षसोः शः ॥ ३ ॥

षकारसकारयोः स्थाने शो भवति ॥ माशे । विलाशे । माषः । विलासः ॥

श is substituted for स and ष......

॥ जो यः ॥ ४ ॥

जकारस्य यकारो भवति ॥ यायदे ॥ जायते ॥
य is substituted for ज......

॥ चवर्गस्यास्पृष्टता तथोच्चारणः ॥ ५ ॥

चवर्गो यथास्पृष्टस्तथोच्चारणो भवति ॥ पलिचए । गहिदछले । वियले । णिज्झले ॥ परिचयः । गृहीतछलः । विजलः । निर्झरः ॥

The palatal letters are pronounced with but a very slight contact of the tongue with the top of the palate ( अस्पृष्टता )...

॥ हृदयस्य हडक्कः ॥ ६ ॥

हृदयस्य स्थाने हडक्को भवति ॥ हडक्के आयले मम ॥ हृदये आदरो मम ॥

हडक्क is substituted for हृदय......

र्य्जयोर्य्यः ॥ ७ ॥

र्यकारर्जकारयोः स्थाने य्यो भवति ॥ कय्ये । दुय्यणे ॥ कार्यम् । दुर्जनः ॥

य्य is substituted for र्य and र्ज ......

॥ प्रकृतिः शौरसेनी ॥ २ ॥

अस्या मागध्याः प्रकृतिः शौरसेनीति वेदितव्यम् ॥

शौरसेनी is the base of this मागधी dialect.

॥ षसोः शः ॥ ३ ॥

षकारसकारयोः स्थाने शो भवति ॥ माशे । विलाशे । माषः । विलासः ॥

श is substituted for स and ष......

॥ जो यः ॥ ४ ॥

जकारस्य यकारो भवति ॥ यायदे ॥ जायते ॥

य is substituted for ज......

॥ चवर्गस्यास्पृष्टता तथोच्चारणः ॥ ५ ॥

चवर्गो यथास्पृष्टस्तथोच्चारणो भवति ॥ पलिच्चए । गहिदछले । वियले । णिज्झले ॥ परिचयः । गृहीतछलः । विजलः । निर्झरः ॥

The palatal letters are pronounced with but a very slight contact of the tongue with the top of the palate (अस्पृष्टता)...

॥ हृदयस्य हडक्कः ॥ ६ ॥

हृदयस्य स्थाने हडक्को भवति ॥ हडक्के आयले मम ॥ हृदये आदरो मम ॥

हडक्क is substituted for हृदय......

र्यर्जयोर्य्यः ॥ ७ ॥

र्यकारर्जकारयोः स्थाने य्यो भवति ॥ कय्ये । दुय्यणे ॥ कार्यम् । दुर्जनः ॥

य्य is substituted for र्य and र्ज ......

॥ क्षस्य स्कः ॥ ८ ॥

क्षस्य स्थाने स्ककारो भवति ॥ लस्कशे । दस्के ॥ राक्षसः । दक्षः ॥

स्क is substituted for क्ष...

॥ अस्मदः सौ हके हगे अहके ॥ ९ ॥

अस्मदः स्थाने सौ परतो हके हगे अहके इत्येत आदेशा भवन्ति ॥ हके हगे अहके भणामि ॥ अहं भणामि ॥

For अस्मद्, followed by सु, हके, हगे and अहके are substituted...

॥ अत इदेतौ लुक् च ॥ १० ॥

साविल्यनुवर्तते । अकारान्ताच्छब्दात्सौ परत इकारैकारौ भवतः । पक्षे लोपश्च ॥ एशि लाआ । एशे पुलिशे । एश पुलिश ॥ एष राजा । एष पुरुषः ॥

सु is implied from the preceding sūtra. When सु follows a noun ending in अ, इ and ए are substituted ; elision of the affix is also optionally allowed......

॥ क्तान्तादुश्च ॥ ११ ॥

क्तप्रत्ययान्ताच्छब्दात्सौ परत उकारश्च भवति ॥ चकारात् इदेतौ लुक् च ॥ हशिदु । हशिदि । हशिदे । हशिद ॥ हसितः ॥

उ is substituted when the affix follows a word ending with the affix क्त ; and also ( as we infer from the च in the sūtra ), we may optionally use इ or ए of the preceding sūtra, or even elide the affix......

ङसो ह्रो वा दीर्घत्वं च ॥ १२ ॥

ङसः षष्ठ्येकवचनस्य स्थाने हकारादेशो वा भवति । तत्संयोगे च दीर्घत्वम् ॥ पुलिशाह धणे । पुलिशश्श धणे । पुरुषस्य धनम् ।

ह is optionally substituted for ङस्, and at the same time the preceding vowel is lengthened...

अदीर्घः संबुद्धौ ॥ १३ ॥

अदन्तादित्येव । अदन्ताच्छब्दादकारो दीर्घो भवति संबुद्धौ ॥ पुलिशा आगच्छ । माणुशा आगच्छ ॥ संबुद्धाविति किम् । बह्मणश्श धणे ॥ ब्राह्मणस्य धनम् ॥

When the affix सु follows a noun ending in अ, in the sense of the vocative, the अ is lengthened. Why do we say in the sense of the vocative ? Compare धणे in the nom. sing...

॥ चिट्ठस्य चिष्ठः ॥ १४ ॥

चिट्ठस्य स्थाने चिष्ठ इत्ययमादेशो भवति ॥ पुलिशे चिष्ठदि ॥ पुरुषस्तिष्ठति ॥

चिष्ट is substituted for चिट्ठ...

॥ कृञ्मृङ्गमां क्तस्य डः ॥ १५ ॥

डुकृञ् करणे । मृङ् प्राणत्यागे । गम्लृ गतौ । एतेषां क्तप्रत्ययस्य स्थाने डकारो भवति ॥ कडे । मडे । गडे ॥ कृतः । मृतः । गतः॥

ड is substituted for the affix क्त in the roots कृ, मृ and गम्......

॥ क्त्वो दाणिः ॥ १६ ॥

क्त्वाप्रत्ययस्य स्थाने दाणि इत्ययमादेशो भवति ॥ शहिदाणि गडे । कलिदाणि आअडे ॥ सोढ्वा गतः । कृत्वागतः ॥

दाणि is substituted for the affix क्त्वा...

॥ शृगालस्य शिआलाशिआलेशिआलकाः ॥ १७ ॥

शृगालशब्दस्य स्थाने शिआलादय आदेशा भवन्ति ॥ शिआला आअच्छदि । शिआले आअच्छदि । शिआलके आअच्छदि ॥ शृगाल आगच्छति ॥

शिआला, शिआले and शिआलके are substituted for शृगाल...

॥ इति वररुचिकृते प्राकृतप्रकाशे मागध्याख्य एकादशः परिच्छेदः ॥

## ॥ अथ द्वादशः परिच्छेदः ॥

॥ शौरसेनी ॥ १ ॥

Now we begin the treatment of the शौरसेनी dialect...

॥ प्रकृतिः संस्कृतम् ॥ २ ॥

The base of शौरसेनी is Sanskrit...

॥ अनादावयुजोस्तथयोर्दधौ ॥ ३ ॥

द and ध are respectively substituted for single, non-initial त and थ.

॥ व्यापृते डः ॥ ४ ॥

ड is substituted for the त in the word व्यापृत. Thus वावडो...

॥ पुत्रेऽपि क्वचित् ॥ ५ ॥

ड is sometimes substituted for the त is पुत्र. Thus पुडो or पुड्डो...

॥ इ गृध्रसमेषु ॥ ६ ॥

इ is substituted for ऋ in the words like गृध्र ; as गिद्धो.

॥ ब्रह्मण्यविज्ञयज्ञकन्यकानां ण्यज्ञन्यानां ञ्जो वा ॥ ७ ॥

ञ्ज is substituted for the conjuncts ण्य, ज्ञ and न्य in the words ब्रह्मण्य, विज्ञ, यज्ञ and कन्या...

॥ सर्वज्ञेङ्गितज्ञयोर्णः ॥ ८ ॥

ण is substituted for ज्ञ in the words सर्वज्ञ and इङ्गितज्ञ...

॥ क्त्व इअः ॥९ ॥

इअ is substituted for क्त्वा ; as, भमिअ...

॥ कृगमोर्दुअः ॥ १० ॥

दुअ is substituted for क्त्वा after the roots कृ, and गम्, as कदुअ, गदुअ...

॥ णिर्जश्शसोर्वा क्लीबे स्वरदीर्घश्च ॥ ११ ॥

णि is optionally substituted for जस् and शस् in the neuter gender and the preceding vowel is lengthened ; as जलाणि...

॥ भो भुवस्तिङि ॥ १२ ॥

भो is substituted for भू when conjugational affixes follow ; as, भोदि...

॥ न लृटि ॥ १३ ॥

भो is not substituted for भू in the Future tense......

॥ दद्तेर्दे । दइस्स लृटि ॥ १४ ॥

दे is substituted for दा ; दइस्स is substituted for दा in the Future tense...

॥ डुकृञः करः ॥ १५ ॥

कर is substituted for कृ ; as, करदि.

॥ स्थश्चिट्ठः ॥ १६ ॥

चिट्ठ is substituted for स्था ; as चिट्ठदि...

॥ स्मरतेः सुमरः ॥ १७ ॥

सुमर is substituted for स्मृ ; as, सुमरदि...

॥ दृशेः पेक्खः ॥ १८ ॥

पेक्ख is substituted for दृश्, as, पेक्खदि...

॥ अस्तेरच्छः ॥ १९ ॥

अच्छ is substituted for अस्...

॥ तिपात्थि ॥ २० ॥

अत्थि is substituted for अस् together with the affix तिप्.

|| भविष्यति मिपा स्सं वा स्वरदीर्घत्वं च || २१ ||

स्सं is optionally substituted for मिप्, the 1st person. sing. affix in the Future ; in the alternative the preceding vowel is lengthened before मिप्. Thus, भविस्सं, भविस्सामि...

|| स्त्रियामित्थी || २२ ||

इत्थी is substituted for स्त्री...

|| एवस्य जेव्व || २३ ||

जेव्व is substituted for एव...

|| इवस्य विअ || २४ ||

विअ is substituted for इव...

|| अस्मदो जसा वअं च || २५ ||

वअं is substituted for अस्मद् together with जस्, as, वअं ; in the alternative we have अम्हे (as we infer from the word च in the sūtra...

|| सर्वनाम्नां ङेः स्सिं वा || २६ ||

स्सिं is optionally substituted for ङि after pronouns ; as, सव्वस्सिं ; in the alternative सव्वम्मि...

|| धातोर्भावकर्तृकर्मसु परस्मैपदम् || २७ ||

The परस्मैपद only is used in the शौरसेनी dialect to express the passive voice.

|| अत एच्च || २८ ||

ए is substituted for the ending अ of the root before the conjugational affixes ; as, गमेदि, हसेदि, करेदि...

|| मिपो लोटि च || २९ ||

ए is also used for मिप् in the Potential mood ; as भवे ; in the alternative we have भवेय्यामि etc......

॥ आश्चर्यस्याच्छरिअं ॥ ३० ॥

अच्छरिअ is substituted for आश्चर्य...

॥ प्रकृत्या दोलादण्डदशनेषु ॥ ३१ ॥

द in the words दोला, दण्ड and दशन remains unchanged in शौरसेनी ( *i. e.*, it is not changed to ड ).

॥ शेषं माहाराष्ट्रीवत् ॥ ३२ ॥

The remainder of the rules are the same as for the माहाराष्ट्री dialect.

॥ इति वररुचिकृते प्राकृतप्रकाशे शौरसेनीलक्षणं नाम द्वादशः परिच्छेदः समाप्तः ॥

# APPENDIX

[ *N. B.* The first figure in the first column indicates the chapter and the second, the number of the Sūtra in the present Edition. The dash indicates omission in the first column and identical reading with the text in the other two columns ].

| Text | संजीवनीस्थः पाठः | सुबोधिनीस्थः पाठः |
|---|---|---|
| १. ३ | इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु च । १. ३ | इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु च । १. ३ |
| १. ५ | ए च शय्यादिषु । १. ५ | — |
| १. ७ | Omitted | Omitted |
| १. ११ | इत्सदा । १. १० | इत्सदा । १. १० |
| १. १७ | ईर्सिंहजिह्वयोः । १. १६ | ईर्सिंहजिह्वयोः । १. १६ |
| — | उद्दुत उपसर्गे विसर्जनीयेन । १. १७ | उद्दुत उपसर्गे विसर्जनीयेन । १. १७ |
| — | ईदितः । १. १८ | ईदितः । १. १८ |
| १. २० | उत ओत्तुण्डसमेषु । १. २१ | उत ओत्तुण्डसमेषु । १. २१ |
| १. २४ | उदूतो मधूकादिषु । १. २५ | उदूतो मधूकादिषु । १. २५ |
| १. २८ | इदृष्यादिषु वा । १. ३० | इदृष्यादिषु वा । १. ३० |
| १. ३० | Omitted | — |
| १. ३१ | युक्तस्यापि रिः । १. ३२ | युक्तस्यापि मध्ये । १. ३२ (a) |
| १. ३३ | लृत इलिः । १. ३४ | लृत इलिः । १. ३४ |
| १. ३४ | एत इद्वा वेदनादेवरयोः । १. ३५ | एत इद्वा वेदनादेवरयोः । १. ३५ |
| १. ३६ | दैत्यादिष्वइत् । १. ३७ | — |
| १. ४० | ओत उद्वा प्रकोष्ठे कस्य वः । १. २८ | ओत उद्वा प्रकोष्ठे कस्य वः । १. २८ |
| १. ४२ | पौरादिष्वउत् । १. ४२ | पौरादिष्वउत् १. ४२ |

| Text | संजीवनीस्थः पाठः | सुबोधिनीस्थः पाठः |
|---|---|---|
| २. ४, ५ | स्फटिकनिकषचिकुरसीकरेषु को हः । २. ४ | स्फटिकनिकषचिकुरसीकरेषु को हः । २. ४ |
| २. ८ | प्रतिवेतसपताकासु डः । २. ७ | प्रतिवेतसपताकासु डः । २. ७ |
| २. ११ | ऐरावते वा । २. १० | ऐरावते वा । २. १० |
| २. १९ | Omitted | Omitted |
| २. २६ | Omitted ( Cf. the next sūtra ). | Omitted ( Cf. the next sūtra ). |
| २. २७ | खघथधफभां हः । २. २४ | खघथधफभां हः । २. २४ |
| २. ३७ | Omitted | Omitted |
| २. ४० | लाहललाङ्गललाङ्गूलेषु वा णः । २.३६ | लाहललाङ्गललाङ्गूलेषु वा णः । २. ३६ |
| २. ४१ | षट्शावकसप्तपर्णेषु छः । २.३७ | षट्शावकसप्तपर्णेषु छः । २.३७ |
| २. ४२ | नो णः । २. ३८ | नो णः । २. ३८ |
| ३. १ | उपरिलोपः कगडतदपषसशाम् । ३. १ | उपरिलोपः कगडतदपषसशाम् । ३. १ |
| ३. १६ | क्ष्वेटके च । ३. १६ | क्ष्वेटके च । ३.१६ |
| ३. १७ | — | कार्यशय्याभिमन्युषु जः । ३.१७ |
| ३. २३ | मृत्तिकापत्तनयोश्च । ३. २३ | मृत्तिकापत्तनयोश्च । ३. २३ |
| ३. ३१ | क्ष्मावृक्षक्षणेषु वा । ३. ३१ | क्ष्मावृक्षक्षणेषु वा । (क्षमा also is noted as a variant). |
| ३. ३६ | स्पस्य । ३. ३६ | स्पस्य । ३.३६ |
| ३. ३७ | Omitted | Omitted |
| ३. ४७ | विह्वले भो वा । ३. ४६ | विह्वले भो वा । ३. ४६ |
| — | आदेश्च । ३. ४७ | आदेश्च । ३. ४७ |
| ३. ५१ | वर्गे युजः पूर्वः । ३. ५१ | वर्गे युजः पूर्वः । ३. ५१ |
| ३. ५५ | आङो ज्ञादेशस्य । ३. ५५ | आङो ज्ञादेशस्य । ३. ५५ |
| ३. ५६ | Omitted | Omitted |

| Text | संजीवनीस्थः पाठः | सुबोधिनीस्थः पाठः |
|---|---|---|
| ३. ५९ | विकर्षः । ३. ५८ | विकर्षः । ३. ५८ |
| ३. ६२ | इत श्रीह्रीक्लान्तक्लेशम्लानस्वप्नस्पर्शादर्शहर्षार्हेषु । ३. ६१ | इः श्रीह्रीक्लान्तक्लेशम्लानस्वप्नस्पर्शादर्शहर्षार्हेषु । ३. ६१ |
| ४. १ | संध्यावच्चामड्लोपविशेषा बहुलम् । ४. १ | संध्यावच्चामड्लोपविशेषा बहुलम् । ४. १ ( a better reading than the one in the present text). |
| ४. २ | उदुम्बरे दोर्वा लोपः । ४. २ | उदुम्बरे दोर्वा लोपः । ४. २ |
| ४. ३ | कालायसे यस्य । ४. ३ | — |
| — | क्षुधो हः । ४. १० | क्षुधो हः । ४. १० |
| ४. १० | शरदोऽत् । ४. ११ | शरदोऽत् । ४. ११ |
| ४.१२, १३ | मो बिन्दुरचि वालोपश्च। ४. १३ | मो बिन्दुरचि वालोपश्च। ४. १३ |
| ४. १४ | नञोर्हलि । ४. १४ | नञोर्हलि । ४. १४ |
| ४. १६ | मांसादिषु । ४. १६ | मांसादिषु । ४. १६ |
| ४. १७ | कपि तद्वर्ग्यान्तः । ४. १७ | कपि तद्वर्ग्यान्तः । ४. १७ |
| ४. १८ | नसन्तप्रावृट्शरदः पुंसि। ४. १८ | नसन्तप्रावृट्शरदः पुंसि । ४. १८ |
| ४. २३ | क्त्व तूण । ४. २३ | क्त्व तूण । ४. २३ |
| ४. २४ | तून इर शीले । ४. २४ | — |
| — | स्वार्थे को वा । ४. २६ | स्वार्थे को वा । ४. २६ |
| ४. २७ | वृन्दे दो वः । ४. २८ | वृन्दे रः । ४. २८ |
| — | महाराष्ट्रे हरोः ४. ३१ | महाराष्ट्रे हरोः । ४. ३१ |
| ४. ३० | बृहस्पतौ बहोः । ४. ३२ | बृहस्पतौ बहोः । ४. ३२ |
| ५. १२ | ए सुप्यङिङसोः । ५. १२ | ए सुप्यङिङसोः । ५. १२ |
| ५. १३ | क्वचिदपि (?) लोपः। ५. १३ | क्वचिदपि (?) लोपः । ५. १३ |
| ५. १६ | Omitted | जस ओ वो वात्वं च । ५. १६ |
| ५. १७ | Omitted | — |

| Text | संजीवनीस्थः पाठः | सुबोधिनीस्थः पाठः |
|---|---|---|
| ५. २० | — | Omitted |
| ५. २१ | — | Omitted |
| ५. २२ | — | Omitted |
| ५. २५ | Omitted | Omitted |
| ५. २६ | इं जस्शसोर्दीर्घः । ५. २६ | इं जस्शसोर्दीर्घः । ५. २६ |
| ५. २८ | आत ए । ५. २८ | आत ए । ५. २८ |
| ५. ३० | नपुंसके सोर्बिन्दुः । ५. २५ | नपुंसके सोर्बिन्दुः । ५.२५ |
| ५. ३२ | मातुरा । ५. ३१ | मातुरा । ५. ३१ |
| ५. ३६ | राज्ञः । ५. ३५ | राज्ञः । ५. ३५ |
| ५. ३९ | Omitted | ङस एच्च । ५. ३८ |
| ५. ४० | Omitted | अमो णं । ५. ३९ |
| ५. ४१ | Omitted | — |
| ५. ४२ | Omitted | ङसश्च द्वित्वं वा जलोपश्च ।५.४१ |
| ५. ४७ | ब्रह्मादयोऽप्येवम् । ५. ४६ | ब्रह्मादयोऽप्येवम् । ५. ४६ |
| ६. १ | सर्वादेः । ५. ४७ and जस एत् । ५. ४८ | सर्वादेः । ५. ४७ and जस एत् । ५.४८ |
| ६. ९ | ओत्तोदो ङसेरनिदमः । ५.५६ | ओत्तोदो ङसेरनिदमः । ५.५६ |
| ६.१०, ११ | तदो ङसा से वा स्त्रियामपि । ५. ५७ | तदो ङसा से वा स्त्रियामपि । ५. ५७ |
| ६. १५ | अं स्सिंस्सयोर्वा । ५. ६१ | अं स्सिंस्सयोर्वा । ५. ६१ |
| ६. १६ | ङेर्म्मेन हः । ५. ६२ | ङेर्म्मेन हः । ५. ६२ |
